# प्रौढभागवतम् -भाग-1



सम्पादकः
डा. आर् विठोबाचार्यः

प्रकाशनम्
वेद-वेदान्ताध्ययनशोधसंस्थानम्
वसन्तकुञ्ज, नवदेहली

विश्वविद्याग्रन्थमाला- 21

वेदवेदान्ताध्ययनशोधसंस्थानम्

श्रीविश्वनन्दनतीर्थविरचितं

# प्रौढभागवतम्-भागः-1

सम्पादकौ

वि । प्रदीपसिंहाचार्यः चतुर्वेदः

डा । आर् विठोबाचार्यः

प्रकाशकः

वेद-वेदान्ताध्ययनशोधसंस्थानम्.

वसन्तकुञ्ज,नवदेहली.

2023

**विश्वविद्याग्रन्थमाला- 21**

**प्रौढभागवतम् - 1**
**श्रीविश्वनन्दनतीर्थविरचितम्**

**सम्पादकौ** : वि। प्रदीपसिंहाचार्यः चतुर्वेदः
डा। आर् विटोबाचार्यः

**प्रकाशनम्** : वेद-वेदान्ताध्ययनशोधसंस्थानम्.
वसन्तकुञ्ज, नवदेहली.

**प्रथममुद्रणम्** : **2023**

**ISBN** : **978-81-978406-0-9**

**पृष्ठसङ्ख्या** : **144+12**

**प्रतयः** : 250

**मूल्यम्:** 100 **रूप्यकाणि**

**मुखचित्रविन्यासः** रघुनन्दनः

**मुद्रणम्** : वागर्थ. बेङ्गलूरु

## जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्
**(पेजावरअधोक्षजमठः,उडुपी)**

# श्रीविश्वप्रसन्नतीर्थश्रीपादानाम् अनुग्रहसन्देशः

निगमकल्पतरोर्गलितं फलं श्रीमद्भागवतं महापुराणं निखिल-वेदान्तसारसर्वस्वं वर्तते। अत्रत्यं प्रतिपदं श्रीकृष्णपरमात्मनः दिव्य-गुणान् प्रस्तौति। तादृशस्य भागवतस्य गभीरार्थबोधनं सामान्यानां कृते दुष्करम्।

अत्यन्तं सन्तोषस्य विषयोऽयं यत् 'वेदवेदान्ताध्ययनशोधसंस्थान' स्य पक्षतः 'प्रौढभागवतम्' इति ग्रन्थः सम्प्रति प्रकाशपदवीं नीतः। अस्य ग्रन्थस्य प्रणेतारः श्रीविश्वनन्दनतीर्थश्रीपादाः। तैरत्र भागवतस्य कानिचन अतिविशिष्टानि श्लोकानि सङ्गृह्य, तेषां कृते अत्यन्तं संक्षिप्ता, प्रमेयबहुला, अपूर्वा च व्याख्या विलिखिता। इयं व्याख्या अल्पाक्षरैरनल्पमर्थं प्रकाशयन्ती विदुषां मुमुक्षूणां च महते उपकाराय कल्पते। ग्रन्थस्यास्य सम्पादनकार्यं विद्वद्भिः प्रदीपसिंहाचार्यैः तथा डा। विठोबाचार्यैः अत्यन्तं श्रद्धया कृतम्। तदीयं परिश्रमं संस्थानस्य सेवां च वयं श्लाघयामः।

शोधसंस्थानमिदं निरन्तरं दुर्लभग्रन्थानां प्रकाशनेन सनातन-धर्मस्य महतीं सेवां कुर्वदस्ति। अनेन सत्कार्येण भगवान् श्रीकृष्णः मुख्यप्राणान्तर्गतः प्रीयताम्। सर्वेषां च ज्ञानिनामन्तःकरणे भक्तिज्ञान-वैराग्याणि वर्धन्तामिति भगवच्चरणारविन्दयोः प्रार्थयामः।

**इत्यनेकनारायणस्मरणानि**

**श्रीविश्वप्रसन्नतीर्थश्रीपादाः**

**पीठाधिपतयः पेजावरअधोक्षजमठः,उडुपि**

श्रीलक्ष्मीहयग्रीवो विजयते

# श्रीश्रीविश्वनन्दनतीर्थश्रीपादाः

(श्रीक्षेत्रहनसोगे मध्वमठः.दोड्डहनसोगे.)

## अनुग्रहसन्देशः

'श्रीमद्भागवतं पुराणममलम्' इत्याद्युक्तदिशा श्रीमद्भागवतपुराणं पुराण राजत्वेन प्रसिद्धम्। तत्रत्यकथासङ्ग्रहात्मकं बालबोधाय कर्नाटक-भाषायां रचितं बालभागवतं पुरा प्रकाशितम्। इदानीं विद्वज्जनोपकाराय भागवतोक्तप्रमेयसङ्ग्रहात्मकं प्रौढभागवतं प्रकाशं लभते।

अत्र भगवत्पादैः, टीकाकृद्भिः, श्रीद्विजयध्वजश्रीमच्चरणैः, अस्मद्गुरुचरणैश्चोक्तानां प्रमेयानां नातिविस्तरः सङ्ग्रहः कृतः। सर्वेषां प्रमेयानां सङ्ग्रहे देवा एवाधिक्रियन्ते। वयं तु यथाशक्ति कतिपय-प्रमेयसङ्ग्रहेणैव कृतार्था इति मन्यामहे। प्रत्यध्यायं भगवन्निष्ठत्वमपि प्रदर्शितम्। इतः पूर्वं प्रकाशिते विजयध्वजीयसमेते श्रीमद्भागवते तत्र तत्र 'इदमस्पष्टम्' इति यत्सूचितं तत्स्पष्टीकरणेऽपि प्रयत्नः कृतः ।

भाषात्रयाविदुषां सखित्वेन वर्णितं श्रीमद्भागवततात्पर्यनिर्णय-मुपजीव्य केवलं भगवत्प्रीत्यै प्रमेयसङ्ग्रहे यतितम्। वैदुष्यभ्रान्त्या वा पदार्थवर्णने कौशलप्रघटनाय वा न वयं प्रवृत्ता इति निवेदयितु-मुत्सहामहे ।

अस्मच्छिष्यवर्गयाञ्चया, श्रीमद्देवेन्द्रतीर्थश्रीमच्चरणानामाशयं ज्ञातु-कामानां विदुषां चोदनेन चानेकवर्षपर्यन्तं कृतश्रमस्य परिपाकोऽयं ग्रन्थ इति ज्ञापयामहे। यदि विदुषोऽत्रोक्तप्रमेयावगाहनेन सन्तुष्येयुस्तर्हि श्रम आस्माकः सार्थको जात इति वयमपि सन्तुष्यामहे।

कीटराज्यप्रदायी भगवान् बादरायणो श्रीमन्मध्वाद्यस्मद्देशिक-पर्यन्तान्तर्यामी कीटमणिप्रभायितज्ञानस्यापि मम आयुरारोग्यज्ञानप्रदाने-नैतद्ग्रन्थग्रथनपाटवदानेन चानुगृहीतवानिति ग्रन्थपूरणरूपकार्यानु-मानेनावगम्यते ।

आमूलाग्रं भागवतमध्यापितवतोऽस्मद्विद्यागुरून् श्रीश्रीदेवेन्द्रतीर्थ-श्रीमच्चरणान् प्रणमन्तः श्रीमद्विजयध्वजाधिष्ठितश्रीमदधोक्षजतीर्थीय-श्रीपेजावरमठाधीशानस्मद्गुरून् श्रीश्रीविश्वेशतीर्थश्रीमच्चरणान् प्रवन्द-मानाः, एतद्ग्रन्थसम्पादने कृतपरिश्रमं विदुषं प्रदीपसिंहाचार्यमभिनन्दन्त उपरमामहे ।

**इति नारायणस्मृतयः**

**श्रीश्रीविश्वनन्दनतीर्थश्रीपादाः**

# निदेशकस्य पुरोवाक्

श्रीमद्भागवतं महापुराणं तु निखिलनिगमसारभूतं, भक्तिज्ञान-वैराग्याणां पावनगङ्गाप्रवाहस्वरूपं च वर्तते। अस्मिन् ग्रन्थराजे विद्यमानानां गूढार्थानां प्रकाशनेन मुमुक्षूणां महान् उपकारो भवति।

अत्यन्तं हर्षस्य विषयोऽयं यत् 'वेदवेदान्ताध्ययनशोध'संस्थानस्य पक्षतः 'प्रौढभागवतम्' इति ग्रन्थं विदुषां पुरतः उपस्थापयामः। अस्य ग्रन्थस्य प्रणेतारः श्रीविश्वेशतीर्थश्रीपादैः अधिगतप्रणवोपदेशाः श्रीमन्माध्वयतिपरम्परायाः सुप्रसिद्धाः ज्ञानिनः श्रीविश्वनन्दनतीर्थाः। तैः अत्र श्रीमद्भागवतस्य कतिपयानां विशिष्टानां श्लोकानां चयनं कृत्वा, तेषां कृते अत्यन्तं संक्षिप्ता किन्तु अपूर्वा, प्रमेयबहुला च व्याख्या विरचिता अस्ति। इयं व्याख्या जिज्ञासूनां कृते भागवतस्य गभीरार्थबोधने प्रदीपप्रायः वर्तते।

अस्य ग्रन्थस्य संपादनकार्यं विद्वद्भिः प्रदीपसिंहाचार्यैः अत्यन्तं परिश्रमेण निर्व्यूढमस्ति। तेषां सेवा अस्माकं संस्थायाः कृते श्लाघनीया।

अस्माकं शोधसंस्थानं सदैव तादृशानां दुर्मिलग्रन्थानां प्रकाशने कटिबद्धं वर्तते येन सनातनधर्मस्य, विशेषतः द्वैतवेदान्तसाहित्यस्य संरक्षणं संवर्धनं च भवेत्। अनेन ग्रन्थप्रकाशनेन अध्येतारः भागवततत्त्वं सुलभतया अवगन्तुं समर्थाः भवेयुरिति अस्माकं दृढविश्वासः। अस्य ग्रन्थस्य मुद्रणे संशोधने च ये साहाय्यं कृतवन्तः, तेभ्यः सर्वेभ्यः कार्तज्ञ्यं निवेदयामि।

डा। आर् विटोबाचार्यः,

**निदेशकः**

# प्राग्वचनम्

ग्रन्थमिममधिकृत्य वक्तव्यं सर्वमपि गुरुपादैरेवोक्तम्। तथापि श्रीमद्भगवतो महाकारुणिकस्यानुग्रहलेशं कामयमानोऽयं जनः किञ्चिद्वक्तुं प्रयतत इति सर्वथा अनुग्राह्यः सहृदयैर्वाचकैरिति सादरमभ्यर्थये ॥

भागवतमूलपाठविषये वक्तव्यं किञ्चित्। पञ्चसप्ततिशतवत्सरात् पूर्वमेव आचार्यैरवमभ्यधायीति किल कथा सुमध्वविजये पण्डिताचार्यैः प्राकाशि ॥

'गुरोरुपान्ते श्रवणे रतैर्द्विजैः सपञ्चषैर्भागवते कदाचन ।
बहुप्रकारे लिखिते तु वाचिते प्रकारमेकं प्रभुरभ्यधाद् दृढम् ॥
परप्रकारेष्वपि सम्भवत्सु ते विनिर्णयोस्मिन् कथमित्युदीरिते ।
मुकुन्दबोधेन महाहृदब्रवीत् प्रकारमेकं भगवत्कृतं स्फुटम्' इति

तेनायमेव शुद्धपाठ इति न किल निर्धारितुं प्रभवाः स्मो वयम्। अद्यावधिमुद्रितेषु वैष्णवपाठत्वेन मन्यमानेष्वपि सर्वेषु भागवतपुस्तकेषु सर्वमूलोदाहृतभागवतपाठानुगुण्यादर्शनात्। यथा चतुर्थस्कन्धे प्रथमे 'दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवान्' इति प्रचलितः। 'दत्तं दुर्वाससं सोमं जज्ञे पुत्रानकल्मषान्' इति भगवानाचार्यः अनुव्याख्याने। यथा वा 'वासुदेवे परे तत्वे' इति गीताभाष्ये। 'वासुदेवे परे तत्वे' इति तु प्रचलितः। तेनात्र कचिदुपलभ्यमानपाठविसंवादेपि नात्र मूलपाठगवेषणावसरः ॥

कानिचन प्रौढभागवतोक्तप्रमेयाणि रुच्यर्थं सूच्यन्ते।

द्वितीयस्कन्धे -नाभ्यां स्थितमिति पद्ये विस्तरेण नाडीसङ्ख्यासंयोजन-क्रमः, तृतीये द्वाविंशाध्याये प्रजाः सृजेति श्लोके काम्यकर्मविचारः, 'स्नातं कृतशिरःस्नानम्' इत्यत्र चतुर्विंशे सुमङ्गलीनामाचरणविचारः, चतुर्थे पुरञ्जनकथायां आध्यात्मिकार्थसङ्ग्रहः।

पञ्चमे भूमण्डल खगोलादिविचार इत्यादिष्वाविष्कृतः प्रमेयविचारः ॥

अस्मदध्ययनावसरे गुरुभिरभिहितान् द्वित्रान् प्रमेयान् उपस्थाप्योपरम्यते। तृतीये 'अव्यक्ताद्याः पृथिव्यन्ताः सर्वाः प्रकृतयः' इत्युक्तम्। प्रकृत्यु-पादानकः सर्गः प्राकृत इत्यप्युक्तम्। किन्तु महदहङ्कारेन्द्रियभूतानां सृष्टिः प्राकृतत्वेन वर्ण्यते। तत्कथमिति। प्रकृतित्वेनोक्तानामेव प्राकृतत्वं कथमिति प्रश्नाभिप्रायः। समाधानं तु -प्रकृतिभूतस्याव्यक्तस्य कालस्वरूपत्वात् महत्तत्त्वं प्राकृतमुच्यते ।

प्रकृतिभूतस्य महतः(विकारात्) कार्यत्वात् अहङ्कारं प्राकृतमित्युच्यते। प्रकृतिभूताहङ्कारोपादानकत्वात् इन्द्रियाणि भूतानि च प्राकृतानीच्युच्यन्त इति ॥

अपरं च - अष्टादशाध्याये तृतीये दिवि उत्पातोल्लेखः। अत्र न द्युशब्दार्थः स्वर्गः। स्वर्गीयोत्पातानां कुत्राप्यनुल्लेखात् तेषां दर्शनासम्भवाच्च। तथाच 'सहस्रधनुषस्तूर्ध्वं द्युशब्देनापि भण्यते' इत्युक्तेरन्तरिक्षोपरितनभागः द्युस्थानीयः । सूत्रभाष्योक्तदिशा द्युस्थितत्वदिवःपरत्वयोरिव। अन्तरिक्षभागीयोत्पाताः महातडिदायो ग्राह्याः ॥

किञ्च दक्षाध्वरप्रसङ्गे 'वपुरानन्दकरम्' इतीन्द्रस्तुतिः। येषां यावद्रूपापरोक्षदर्शनयोग्यता तावद्रूपाभेददर्शनमपि भवति। तथा तद्गतगुणक्रियाजात्यादीनामपि। यथा अद्वैताचार्यस्य वेदव्यासस्त्रीरूपदर्शनेपि नान्यरूपदर्शनयोग्यता। स्वाभेदो हि धर्मविशेषः। तेन न सर्वेषां तदवकाशः ॥

इत्याद्यनेकप्रमेयाणि गुरुमुखादेव अध्येतव्यानि। अत एव 'शुकमध्यापयामास' इति पौराणिकी वाक् ॥

अत्रापि प्रमेयनिरूपणावसरे इति गुरुपादाः, गुरुमुखादेवावगन्तव्यम् इत्यादि। निर्मत्सरसदाधिकारिकोंयं प्रौढभागवताख्यो ग्रन्थवरः नूनमुपाकरोति सर्वेषां भागवतीयप्रमेयपीयूषजुषामिति नास्त्यत्र संशयलेशः ॥

अध्ययनसौकर्याय प्रायः सन्धिविच्छेदः कृतस्तत्र तत्रेति नात्र विसन्धिप्रयोगदोषगवेषणा ॥

प्रतिश्लोकं प्रतिपदमनेकाकूतिगर्भितं श्रीमद्विजयध्वजीयटीका-साहित्येनामलभागवतपुराणम् आमूलाग्रम् उपदेशकान् प्रसङ्गतो दक्षपक्षविहृतेन समधिकस्वरश्रिया हंसो मानसात् काकमिव आधुनिक-वैज्ञानिकजं मानसं दोषं विपक्षे बाधकयुक्तिपुरस्सरं भीषयतः सुयुक्ति-गर्भाभिरुक्तिभिरसकृत्प्रमेयं बोधयतः परमहंसान् अस्मद्गुरुवरान् श्रीविश्वनन्दनतीर्थश्रीमच्चरणान्साष्टाङ्गपुरस्सरमभिवादये ॥

बहुशः शोध्यमानेपीत्यलमात्मश्लाघया, किन्तु क्षतिरेकापि क्षतिरेव गुणसन्निपातेष्विति न्यायं मानयंश्चेतसि विलज्जमानोयं साञ्जलि सुचेतसां प्रचेतसां क्षमां याचते ॥

आशासे च विद्वांसः स्वकटाक्षाभिवृष्ट्या गुरूणामेतद्ग्रन्थरचनश्रमं सफलयिष्यन्तीति अलमतिप्रपञ्चितेन वाचाम् ॥

इति विद्वज्जनवशंवदस्य
सि.आर्. प्रदीपसिंहाचार्यस्य

# द्वितीयमुद्रणमधिकृत्य

प्रौढभागवतम् इति ग्रन्थोयम् 2017 मध्ये श्रीहयग्रीवविट्ठलट्रस्ट् पक्षतः मुद्रितः। तदनु इदानीं तस्यानुपलभ्यमानत्वात् पुनः वेद-वेदान्ताध्यनशोधसंस्थानपक्षतः सारस्वतलोकं प्रति समर्प्यत इति महान् प्रमोदविषयः। पूर्वप्रकाशने विद्यमानटङ्कणदोषाः अपसारिताः यथामति । विशेषांशा अपि तत्रत्र योजिताः। प्रथमप्रकाशने श्रीविश्वनन्दनतीर्थैः प्रदत्तः अनुग्रहसन्देशः यथावद् योजितः। तथा प्राग्वचनमपि। सहृदयाः विद्वांसः भागवतरसास्वादनेन भगवद्भक्तिभाजना भवेयुरित्याशासाते ।

एतद्ग्रन्थस्य सम्पादने प्रकाशने च पूर्णानुग्रहं कृतवतां श्रीपेजावर-मठाधीशानां श्रीश्रीविश्वप्रसन्नतीर्थश्रीपादानां परमानुग्रहः सर्वदा भूयादिति प्रार्थयावहे ।

**संपादकौ**

### श्रीमद्बादरायणप्रणीतम्

# श्रीमद्-भागवतम्

## अथ प्रथमः स्कन्धः

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यं सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ।। १ ।।

### श्रीश्रीविश्वनन्दनतीर्थविरचितं-भागवतव्याख्यानम्

## प्रौढभागवतम्

विजयध्वजसत्तीर्थचित्तस्थमध्वमञ्चके ।
शयानं रुग्मिणीसत्यासहायं प्रणमाम्यहम् ।। १ ।।

नत्वा गुर्वादिशर्वादिगुर्वन्तान् सकलान् गुरून् ।
दुर्वादिगर्वशैलेशविपाटनसुपाटवान् ।। २ ।।

श्रीमद्भागवतप्रोक्तप्रमेयानां सुसङ्ग्रहम् ।
कुर्वेहं श्रीशसन्तुष्ट्यै लेशतः शिष्ययाच्ञया ।। ३ ।।

बालभागवतं प्रोच्य बालानां च मनोरमम् ।
प्रौढभागवतं वक्ष्ये प्रौढानां सुमनोहरम् ।। ४ ।।

‘सर्वोत्कर्षे देवदेवस्य विष्णोः महातात्पर्यं नैव चान्यत्र सत्यम्’ इति श्रुत्यनुरोधेन विष्णोः सर्वोत्तमत्वमेव सकलशास्त्रप्रतिपाद्यं मुख्यं प्रेमयम् । तदेतदाह भगवान् बादरायणः ‘सत्यं परं धीमहि’ इति । सत्यं विष्णुं परं सर्वोत्तमं धीमहीति । उदाहृतश्रुतिस्थसत्यपदार्थत्वेन सत्यमित्यावर्तनीयम् ।।

विष्णोः सर्वोत्कर्षो नाम सर्वगुणोत्कर्ष एव । तदप्याह ‘सत्यं परं धीमहि’ इति । ‘पॄ पालनपूरणयोः’ इत्यतः परशब्दो पूर्णत्ववाची । योग्यतया गुणेन सम्बन्धः । सत्यं विष्णुं परं गुणपूर्णं धीमहि इत्यर्थः ।।

गुणपूर्णत्वस्य असम्भावनाशङ्कायामप्येतदेवोत्तरम् । सत्यमिति हेतु-गर्भविशेषणम् । सत्यत्वात् परं धीमहीति । ‘सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते’ इति गीतोक्तेः सद्भावं यापयतीति सत्यः सृष्टिकर्ता ।।

‘सत्’ इति भावप्रधानम् ।। सत्वं जीवनं प्राणाधारणरूपलक्षणं यापयीति सत्यः स्थितिकर्ता ।।

‘षद्लृ विशरणगत्यवसादनेषु’ इत्यतः क्विपि सत् विशरणम् नाशः, तद्यापयतीति सत्यः लयकर्ता ।।

एवं सृष्टिस्थितिलयकर्तृत्वात् गुणपूर्णत्वं नासम्भावितमिति ।।

भवतु विष्णोः अमुक्तजगत उत्तमत्वम् । मुक्तजगतः कथम् । मुक्तानां ब्रह्मणा एकीभावप्राप्तेरित्याशङ्कायामपि इदमेवोत्तरम् । सत्यशब्दो मुक्तामुक्त-नियामकत्वमाह । परशब्दो वैलक्षण्यमाह । यतः अस्य जन्मादि तं सत्यं मुक्तामुक्तोत्तमं परं मुक्तामुक्तजगद्विलक्षणं धीमहीति । ‘उतामृतत्वस्येशानः’, ‘मुक्तानां परमा गतिः’, ‘अमृतस्यैष सेतुः’ इत्यादिरत्र प्रमाणम् ।।

विमतो भिन्नो मुक्तत्वात् यदित्थं तत् तथा यथा सम्प्रतिपन्नम् इति युक्तिरपि ‘परम्’ इत्यनेन सूचितं भवति ।।

अस्वतन्त्रचेतनेषु रमाया उत्तमत्वमप्यनेनाह । सत्यं नामैकदेशे नामग्रहणन्यायेन सत्यभामाम्, अथवा एकदेशविकृतन्यायेन सत्यां परं अस्वतन्त्रचेतनोत्तमं धीमहीति ।। पुल्लिङ्गं च 'कूटस्थोक्षर उच्यते' इतिवत् ।।

वायोर्जीवोत्तमत्वमप्यनेनाह । 'सत्यो वायुरुदाहृतः' इत्युक्तेः सत्यं वायुं परं जीवोत्तमं धीमहीति । रमावाय्वोः यथायोग्यं सृष्ट्यादिकर्तृत्वं विद्यत एवेति नान्वयाभावः ।।

'जन्माद्यस्य यतः' इत्यनेन भगवतः सृष्ट्याद्यष्टकर्तृत्वं, 'अन्वयात्' इत्यनेन वेदैकवेद्यत्वं, सर्वशब्दसमन्वयविषयत्वं च, 'इतरतः' इत्यनेन युक्त्यनुसन्धानरूपमीमांसाविषयत्वं, 'अर्थेष्वभिज्ञः' इत्यनेन सर्वज्ञत्वं, 'स्वराट्' इत्यनेन स्वप्रकाशत्वम्, अनन्याधीनत्वं च, 'तेने ब्रह्म हृदा य आदिकवये' इत्यनेन जगद्गुरुत्वं, 'मुह्यन्ति यं सूरयः' इत्यनेन ज्ञानिभिरपि साकल्येन अवेद्यत्वं, 'यत्र त्रिसर्गो मृषा' इत्यनेन सृष्ट्यादेः भगवत्स्वभावत्वं, 'धाम्ना' इत्यादिना स्वसामर्थ्येन सर्वदा दूरीकृतेन्द्रजालादियुक्तत्वं, 'सत्यम्' इत्यनेन सच्चिदानन्दविग्रहवत्वं 'परम्' इत्यनेन पूर्वोक्तरीत्या गुणपूर्णत्वं जगद्विलक्षणत्वं, 'धीमही'त्यनेन जिज्ञास्यत्वं चोक्तं वेदितव्यम् ।। १।।

**धर्मः प्रेज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां**
**वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।**
**श्रीमद्भागवते महामुनिकृते किं वाऽपरैरीश्वरः**
**सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्।। २ ।।**

'प्रोज्झितकैतव' इत्यनेन फलानुसन्धानाभाव उक्तः । परम इत्यनेन ईश्वरसमर्पणम् । अतः अत्र प्रतिपाद्यो धर्मः भगवत्प्रेरणानुसन्धानसहित-भगवत्प्रीतिकामनया अनुष्ठीयमान धर्म इत्युक्तं भवति । स एव भागवत धर्मो

नाम । अस्मिन् श्लोके श्रीमद्भागवतस्य अपरोक्षसाधनत्वरूपः प्रमेय उक्तो वेदितव्यः ।।

**निगमकल्पतरोर्गलितं फलं**
**शुकमुखादमृतद्रवसंयुतम् ।**
**पिबत भागवतं रसमालयं**
**मुहुरहो रसिका भुवि भावुकाः ।। ३ ।।**

'शुकमुखात्' इत्यत्र महाविरक्तश्रीशुकोपदिष्टत्वादतिस्वादुत्वं ज्ञाप्यत इत्यर्थः । यथा शुकदष्टत्वं फलस्थस्वादुत्वज्ञापकं तथेति भावः । अत्र श्रीमद्भागवतस्य सदा सेव्यत्वमुक्तम् ।।

**नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।**
**सत्रं सर्गाय लोकाय सहस्रसममासत ।। ४ ।।**

'नैमिशे अनिमिष' इत्यत्र मुमुक्षुभिः वैष्णवं क्षेत्रमाश्रयणीयमित्युक्तम् ।।

**त एकदा तु मुनयः प्रातर्हुतहुताशनाः ।**
**सत्कृतं सूतमासीनं पप्रच्छुरिदमादृताः।। ५ ।।**

'प्रातर्हुतहुताशना' इत्यत्र प्रातर्होमानन्तरं कथाप्रश्न इत्युच्यते । अनेन यज्ञादिकरणसमयेऽपि विष्णुकथाश्रवणेऽवधानेन भाव्यमित्युक्तं भवति । तदुक्तं 'क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेतो न भवाय कल्पते' इति दशम-स्कन्धे ।।

**ऋषयः ऊचुः—**

**त्वया खलु पुराणानि सेतिहासानि चानघ ।**
**आख्यातान्यप्यधीतानि धर्मशास्त्राणि तान्युत ।। ६ ।।**

‘त्वया’ इत्यादिना ‘प्रत्यक्षं गुरवः स्तुत्याः’ इति प्रतिपाद्यते । सन्तुष्ट-गुरूपदेशस्यैव सिद्धिहेतुत्वात् ।।

**तत्र तत्राञ्जसाऽयुष्मन् भवता यद्विनिश्चितम् ।**
**पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हति ।। ९ ।।**

‘आयुष्मन्’ इत्यत्र सूतस्य वक्तृत्वेऽपि ऋषीणां श्रोतृत्वेऽपि जात्या श्रेष्ठा ऋषयः आशीर्ददतीति ज्ञातव्यम् ।।

**अस्मिन्नध्याये शौनकप्रश्नव्याजेन धीमहीति पदसूचितं विष्णोरेव जिज्ञास्यत्वमुक्तमवधेयम् । एवमेव प्रत्यध्यायमपि भगवदेक-निष्ठम् । तच्च तत्र तत्र दर्शयिष्यामः ।।**

**।। इति श्रीमद्भागवते प्रथमस्कन्धे प्रथमोऽध्यायः ।।**

## अथ द्वितीयोऽध्यायः

**सूत उवाच—**

**यं प्रव्रजन्तमनुपेतमपेतकृत्यं**
**द्वैपायनो विरहकातर आजुहाव ।**
**पुत्रेति तन्मयतया तरवोऽपि नेदु-**
**स्तं सर्वभूतहृदयं मुनिमानतोऽस्मि।। २ ।।**

‘सर्वभूतहृदयम्’ इत्यनेन अन्तरङ्गगुरुत्वमुक्तम् ।। अत एव समीप एव स्थितत्वात् दूरादाह्वानाभावात् ‘पुत्रेति’ इत्यत्र प्लुताभावात् प्रगृह्य - संज्ञाभावः ।।।

**यः स्वानुभावमखिलश्रुतिसारमेक-**
**मध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ।**

**संसारिणां करुणयाऽऽह पुराणगुह्यं**
**तं व्याससूनुमुपयामि गुरुं मुनीनाम् ।। ३ ।।**

'आह पुराणगुह्यम्' इत्यनेन बहिरङ्गगुरुत्वमुक्तम् । 'व्याससूनुम्' इत्यनेन 'गुरोर्नाम न गृह्णीयात्' इति शासनमनुसृतम् ।।

**नारायणं नमस्कृत्य नरश्चैव नरोत्तम् ।**
**देवीं सरस्वतीं व्यासं ततो ग्रन्थमुदीरये ।। ४ ।।**

'नारायणम्' इत्यत्र नारायण एव कृष्णः तदन्ये अवताराश्च । देवी एव रुग्मिणी सत्यभामा सीता च । नरोत्तमो वायुरेव हनुमान् भीमश्च । स एव भाविब्रह्मा च । सरस्वती एव द्रौपदी तस्या एव भाविसरस्वतीत्वात् । सैव वेदविद्या च । नर एव बलरामः अर्जुनश्च । नरबलरामयोः शेषावतारत्वात्, अर्जुनस्य नराविष्टत्वात् । व्यासः ग्रन्थकर्ता प्रथमस्कन्धे प्रतिपाद्यश्च । एतेषामेव कथा भागवतीति भागवतारम्भे त एव नम्याः । तदुक्तमाचार्यैः 'कृष्णः सत्या भीमपार्थौ च कृष्णेत्युक्ता हि भारते' इति । इदं च पुराणं भारतार्थविनिर्णयम् ।।

**वदन्ति तत्तत्वविदस्तत्वं यज्ज्ञानमद्वयम् ।**
**ब्रह्मेति परमात्मेति भगवानिति शब्यते ।। ११ ।।**

'वदन्ति' 'शब्यते' इत्याभ्यां ब्रह्म अवाच्यमिति मतं निराह ।।

**शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः ।**
**हृद्यन्तःस्थो ह्यभद्राणि विधुनोति सुहृत् सताम्।। १८ ।।**

'शृण्वताम्' इत्यत्र कथाश्रवणेन श्रवणद्वारा हृदयं प्रविश्य तत्स्थमलं परिहरति । अतः मनोनैर्मल्यमिच्छद्भिः हरिकथा अवश्यं सेवनीया इत्युक्तं भवति ।।

**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।**
**क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ।। २२ ।।**

'छिद्यन्ते सर्वसंशयाः' इत्यत्र यद्यपि मननापरपर्यायजिज्ञासया संशयं परिहृतवतः तत्वनिश्चयानन्तरं ध्यातवत एवापरोक्षज्ञानम्, तथापि अपरोक्ष-ज्ञानैकनिवर्त्याः संशयाः केचन सन्ति । ते सर्वे छिद्यन्त इति भावः ।।

**सत्वं रजस्तम इति प्रकृतेर्गुणास्तै-**
**र्युक्तः परः पुरुष एव इहास्य धत्ते ।**
**स्थित्यादये हरिविरिञ्चिहरेति सञ्ज्ञाः**
**श्रेयांसि तत्र खलु सत्वतनौ नृणां स्युः ।। २४ ।।**

'स्थित्यादये हरिविरिञ्चिहरेति संज्ञा' इत्यत्र स्थितये सत्वगुणधारकः स्वयं विष्णुरूप आस्ते । सृष्टये रजोगुणधारकः ब्रह्मान्तर्यामी ब्रह्मरूप आस्ते । लयाय तमोगुणधारकः शिवान्तर्यामी शिवरूप आस्त इति विवेकः । तदुक्तं भगवत्पादैः 'ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः' । स्वयं निर्गुणोऽपि लीलया गुणान् धत्ते । तच्च स्पष्टम् आरम्भणाधिकरणे ।।

**मुमुक्षवो घोरमूढान् हित्वा भूतपतीनथ ।**
**नारायणकलाः शान्ता भजन्ति ह्यनसूयवः ।। २७ ।।**

'घोरमूढान्' इत्यत्र राजसतामसान् भूतपतीन् रुद्रादीनिति श्रीमद्विजय-ध्वजतीर्थश्रीमच्चरणैर्व्याख्यातम् । अत्र रुद्रपदेन रुद्रपार्षदास्तामसा भूतपतयो ग्राह्याः ।।

**रजस्तमःप्रकृतयः समशीलान् भजन्ति वै ।**
**पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ।। २८ ।।**

‘समशीलान्’ इत्यत्र सेवकसमानशीलानिति च । झटिति पितृभूत-प्रजेशाः राजसतामसा इति भाति । भूतानां रुद्रपार्षदानां तामसत्वेऽपि भूतेशानां तामसत्वाभावात् कथमेतदिति चेदुच्यते । अवैष्णवै राजसतामसैः कृताः पूजाः महावैष्णवाः पित्रादयो नैव स्वीकुर्वन्ति । किन्तु देवतासनामकाः दीनत्वात् देवनामानः दैत्या एव स्वीकुर्वन्ति लौकिकफलानि ददति च देवतास्तु तन्नियामकाः । अतः सुष्ठूक्तं ‘समशीलान्’ इति ‘घोरमूढान्’ इति च ।।

**अस्मिन् अध्याये भगवतः सृष्ट्यादिमहिमा वर्णिता ।।**

**।। इति श्रीमद्भागवते प्रथमस्कन्धे द्वितीयोध्यायः ।।**

## अथ तृतीयोऽध्यायः

**सूत उवाच—**

**जगृहे पौरुषं रूपं भगवान् महदादिभिः ।**
**सम्भूतं षोडशकलमादौ लोकसिसृक्षया ।। १ ।।**

**यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ।**
**नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः ।। २ ।।**

‘यस्याम्भसि शयानस्य’ इत्यत्र पूर्वं परमपुरुषावतारमुक्त्वा ततो विवेकमकृत्वा पद्मनाभावतारो वर्णितः । सेयं रीतीनां शतकस्य मध्ये एका रीतिः । यथा हिरण्याक्षवधस्य अविवेकः तृतीयस्कन्धे ।।

**यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ।**
**तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितम् ।। ३ ।।**

‘यस्यावयवसंस्थानैः’ इत्यत्र एवमेवाविवेकेन ब्रह्माण्डान्तर्गतपुरुषावतारो वर्णितः ।।

**एतन्नानावताराणां निधानं बीजमव्ययम् ।**
**यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ।। ५ ।।**

'एतन्नानावताराणाम्' इत्यत्र पुनः द्वितीयश्लोकोक्तः पद्मनाभावतार एव विशिष्यते ।।

**षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।**
**आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ।। ११ ।।**

वैदिकसाङ्ख्यशास्त्रमत्रोक्तं साङ्ख्यम् । तत्प्रणेता कपिलो भगवानेव । तच्छिष्य आसुरिः सन्निति ज्ञातव्यम् । लोकप्रसिद्धं साङ्ख्यं तत्प्रणेता कपिलः तच्छिष्य आसुरिश्च अन्य एव ।।

**अष्टमो मेरुदेव्यां तु नाभेर्जात उरुक्रमः ।**
**दर्शयन् वर्त्म धीराणां सर्वाश्रमनमस्कृतम् ।। १३ ।।**

'अष्टमो मेरुदेव्याम्' इत्यत्र इदानीन्तना जैना अपि स्वेषां प्रथमं तीर्थङ्करं ऋषभं, तन्मातरं मेरुदेवीं, तत्पितरं नाभिं, तत्कालं कृतयुगं चाहुरिति ज्ञातव्यम् ।।

**रूपं स जगृहे मात्स्यं चाक्षुषान्तरसंल्पवे ।**
**नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् ।। १५ ।।**

'रूपं स जगृहे मात्स्यम्' इत्यत्र चाक्षुषान्तरप्रलयकाले अवतीर्णो मत्स्यो वर्ण्यते । इतो भिन्नः हयग्रीवासुरसंहारकः आदिसृष्टिकालीनः मत्स्यावतारः अस्तीति ज्ञातव्यम् ।।

**एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।**
**रामकृष्णाविति भुवो भगवानहरद्भरम्।। २३ ।।**

'रामकृष्णौ' इत्यत्र (बल)रामाविष्टः शुक्लकेशः ।।

**स वा इदं विश्वममोघलीलः**
**सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ।**
**भुतेषु चान्तर्हित आत्मतन्त्रः**
**षाड्वर्गिकं जिघ्रति षड्गुणेशः।। ३६ ।।**

'षाड्वर्गिकं जिघ्रति षड्गुणेशः' इत्यत्र षडिन्द्रियनियामकतया तत्स्थो भगवन् सर्वैः भूतैः षडिन्द्रियद्वारा यद्यद् भुज्यते तत्रस्थसारं स्वीकरोतीति भावः ।।

**निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ।**
**तदिदं ग्राहयामास सूतमात्मवतां वरम् ।। ४१ ।।**

'सुतमात्मवतां वरम्' इत्येतद्विशेषणद्वयं हेतुगर्भम् ।।

**अस्मिन्नध्याये भगवतः अवतारवर्णनं कृतम् ।।**

**।। इति श्रीमद्भागवते प्रथमस्कन्धे तृतीयोऽध्यायः ।।**

## अथ चतुर्थोऽध्यायः

**स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् ।**
**अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ।। ७ ।।**

'गोदोहनमात्रम्' इत्यत्र एकवारं गोस्तनपीडनपर्याप्तकालमित्यर्थः ।।

**शिवाय लोकस्य भवाय भूतये**
**य उत्तमश्लोकपरायणा जनाः ।**
**जीवन्ति नात्मार्थमसौ परां श्रियं**
**मुमोच निर्विद्य कुतः कलेवरम् ।। ११ ।।**

'जीवन्ति नात्मार्थम्' इत्यत्र देहाभिमानशून्यत्वेन स्वात्मार्थं ये न जीवन्ति तादृशा अपि विरक्तपुरुषाः परार्थं जीवन्ति इति भावः । यथोक्तमभियुक्तैः 'परोपकारार्थमिदं शरीरम्' इति ।।

**अस्मिन् अध्याये भगवतो व्यासदेवस्य सज्जनानुजिघृक्षया वेद-विभजन-महाभारतनिर्माणाख्यमहिमा वर्णितः ।।**

**।। इति श्रीमद्भागवते प्रथमस्कन्धे चतुर्थोऽध्यायः ।।**

## अथ पञ्चमोऽध्यायः

**आमयोऽयं च भूतानां जायते येन सुव्रत ।**
**तदेव ह्यामयद्रव्यं तत्पुनाति चिकित्सितम् ।। ३३ ।।**

'तदेव ह्यामयद्रव्यम्' इत्यत्र यथा सर्पदंशनजन्यविषपीडापरिहारार्थं चिकित्सितं सर्पविषमेव लोके दीयते तथेति द्रष्टव्म् । सुप्रसिद्धं चैतद्विधचिकित्सनम् अपभ्रष्टभाषायां 'होमियोपति' इत्येतत्संज्ञके वैद्यकीये ।।

**एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।**
**त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ।। ३४ ।।**

**यदत्र क्रियते कर्म भगवत्परितोषणम् ।**
**ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ।। ३५ ।।**

एवं दृष्टान्तमुक्त्वा दार्ष्ट्रान्तिकमाह- एवमिति ।।

**अस्मिन्नध्याये श्रवणादिनवके श्रवणं पादसेवनमित्येतद् द्वयमुक्तं भवति । भगवन्महिमावर्णनस्यैव भगवत्प्राप्तिसाधनत्वस्य वर्णनात् भगवन्निष्ठ एतदध्याय इत्यवगन्तव्यम् ।।**

**।। इति श्रीमद्भागवते प्रथमस्कन्धे पञ्चमोऽध्यायः ।।**

## अथ षष्ठोऽध्यायः

**तदा तदहमीशस्य भक्तानां समभीप्सितम् ।**
**अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तराम् ॥ १० ॥**

'अनुग्रहं मन्यमानः' इत्यत्र मातुर्मरणं कथमनुग्रह इति मा शङ्कि । विद्यमानमेकमपि बन्धुमोहबन्धनं छिन्नमिति मन्वानस्य इदं वचनमिति ॥

**स्फीतान् जनपदांस्तत्र पुरग्रामव्रजाकरान् ।**
**खेटान् पट्टनवाटीश्च वनान्युपवनानि च ॥ ११ ॥**

'स्फीतान् जनपदान्' इत्यादिना आनुकूल्यसहितप्रदेशान् अतिक्रम्य गतवान् इत्युच्यते । अनेन विषयेषु रागाभावो द्योत्यते ॥

**तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आश्रितः ।**
**आत्मनाऽऽत्मानमात्मस्थं यथाश्रुतमचिन्तयम् ॥ १६ ॥**

'यथाश्रुतम्' इत्यनेन गुरूणां सकाशात् प्राप्तैव विद्या फलिष्यति इति सूचयति ॥

**रूपं भगवतो यत्तन्मनः कान्तं सुखावहम् ।**
**अपश्यन्सहसोत्तस्थौ कैवल्याद् दुर्मना इव ॥ २२ ॥**

'कैवल्यादिव' इत्यनेन भगवद्दर्शनजन्यसुखं मौक्तिकसुखसदृशमिति सूचितम् ॥

**एवं यतन्तं विजने मामाहागोचरो गिराम् ।**
**गम्भीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २४ ॥**

'शुचः प्रशमयन्निव' इत्यत्र वस्तुतः शुक् न प्रशान्तेत्यर्थः । भगवददर्शनेन

व्यथा प्राप्ता । अशरीरवचनश्रवणेन किञ्चित् समाधानं जातम् । किन्तु व्यथा न निवृत्तेति भावः ।।

**हन्तास्मिञ्जन्मनि भवान्न मां द्रष्टुमिहार्हति ।**
**अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ।। २५ ।।**

'अविपक्वकषायाणाम्' इत्यत्र पूर्वजन्मनि उपबर्हणाख्यगन्धर्वत्वे यद्देव-हेलनं कृतं सप्तमस्कन्धोक्तप्रकारेण तज्जन्यपापस्याभुक्तत्वात् तद्भोजनस्य शूद्रजन्मान्त एव समाप्तेः, एतत्काले अभुक्तपापफलत्वमिति ज्ञातव्यम् । अत एव 'हित्वाऽवद्यमिदं लोकं गन्ता सज्जनतामसि' इति वदिष्यति ।।

**मतिर्मयि निबद्धेऽयं न विपद्येत कर्हिचित् ।**
**प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात् ।। २८ ।।**

'प्रजासर्गनिरोधेऽपि' इत्यत्र प्रलयेऽपि इति नार्थः । प्रलये सुप्तत्वेन स्मृतेरसम्भवात् । अतः प्रलयानन्तरं जन्मान्तरेऽपीत्येवार्थः ।।

**एतावदुक्त्वोपरराम तन्महद्-**
**भूतं नभोलिङ्गमलिङ्गमीश्वरम् ।**
**अहश्च तस्मै महतां महीयसे**
**शीर्ष्णावनामं विदधेऽनुकम्पितः ।। २९ ।।**

महद्भूतं विष्णुः ।' एको विष्णुर्महद्भूतम्' इत्युक्तेः ।।

**एवं मयि प्रयुञ्जाने शुद्धां भागवतीं तनुम् ।**
**प्रारब्धकर्मनिर्वाणो न्यपतत्पाञ्चभौतिकः ।। ३२ ।।**

'प्रारब्धकर्मनिर्वाणः' इत्यत्र अस्य शूद्रजन्मनो यत्कारणं प्रारब्धकर्म तस्य विनाशे तद्देहः पतित इति भावः । नतु अशेषप्रारब्धकर्मनाशः नारद-

जन्मनिमित्तप्रारब्धकर्मणः शिष्टत्वात् । अनेनेयमवस्था ब्रह्मज्ञानोत्तरकालीन-प्रारब्धकर्मभोगावस्था इति सूचितम् ।।

**कल्पान्त इदमादय शयानेऽम्भस्युदन्वतः ।**
**शिशयिष्णोरनुप्राणं विवेशान्तरहं विभोः ।। ३३ ।।**

'कल्पान्ते' इत्यत्र महाप्रलयकाले ब्रह्माणं प्रविश्य तद्वारा विष्णुप्रवेश उक्तः ।।

**सहस्रयुगपर्यन्तमुत्थायेदं सिसृक्षतः ।**
**मरीचिमिश्रा ऋषयः प्राणोभ्योऽहञ्च जज्ञिरे ।। ३४ ।।**

'सहस्रयुगपर्यन्तम्' इत्यत्र ब्रह्मणः प्रथमपरार्धस्य अन्तिमरात्रिः चतुर्युग-सहस्रपरिमिता । तदवसानसमय इत्यर्थः ।।

**अन्तर्बहिश्च लोकान्स्त्रीन् पर्येम्यस्कन्दितव्रतः ।**
**अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ।। ३५ ।।**

'अनुग्रहान्महाविष्णोः' इत्यत्र विष्ण्वनुग्रहाभावे एतादृशव्रतस्यासाध्यत्व-मुक्तं ज्ञेयम् ।।

**प्रगायतश्च वीर्याणि तीर्थपादः प्रियश्रवाः ।**
**आहूत इव मे शीघ्रं दर्शनं याति चेतसि ।। ३७ ।।**

'आहूत इव' इत्यत्र यथा आहूतः दामोदरादिनामभिः वीणागानेन आहूतः तथा तद्रूपेण चेतसि दर्शनं यातीत्यर्थः ।।

**अहो देवर्षिर्धन्योऽयं यः कीर्तिं शार्ङ्गधन्वनः ।**
**गायन् माध्व्या गिरा तन्त्र्या रमयत्यातुरं जगत् ।। ४२ ।।**

'माध्व्या' इत्यत्र मध्वसम्बन्धिन्या इत्यर्थः ।।

**अस्मिन्नध्याये नारदेन स्वदृष्टान्तेन भगवत्कथावर्णनस्य भवसिन्धुप्लवत्ववर्णनाद् भगवन्निष्ठता ज्ञेया ।।**

**।। इति श्रीमद्भागवते प्रथमकन्धे षष्ठोऽध्यायः ।।**

## अथ सप्तमोऽध्यायः

**स संहितां भागवतीं कृत्वाऽनुक्रम्य चात्मजम् ।**
**शुकमध्यापयामास निवृत्तिनिरतं मुनिम् ।। ८ ।।**

'आत्मजम्' इत्यत्र आत्मजत्वं निवृत्तिनिरतत्वं च भागवताध्यापने हेतुद्वयम् । आत्मजस्य स्वाभाविकशिष्यत्वात् अध्यापनयोग्यत्वम् । निवृत्तिनिरतत्वं भागवताध्यापने अपेक्षितः श्रोतृगुणः । विरक्तानामेव भागवते अधिकारात् । तदुक्तमभियुक्तैः 'भक्त्या भागवतं शास्त्रं न व्युत्पत्त्या न टीकया' इति । विरक्तानामेव भक्तिरिति । तथाहि भगवति माहात्म्यज्ञानपूर्वको दृढस्नेहो भक्तिः । उक्तलक्षणा भक्तिः विषयेषु अप्रीतिमतामेव भवतीति ।।

**हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ।**
**अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियम्।। ११ ।।**

'हरेर्गुणाक्षिप्तमतिः' इत्यत्र यथा गुडेन आकृष्टाः पिपीलिकाः गुडं प्रति सरन्ति तथा भगवद्भक्ताः भगवद्गुणाकृष्टाः सन्तः भागवतं प्रति सरन्तीति भावः ।।

**तन्मा शुचस्ते प्रमृजाशु भद्रे**
**यद्ब्रह्मबन्धोः शिर आततायिनः ।**
**गाण्डीवमुक्तैर्विशिखैरुपाहरे-**
**त्वाक्रम्य यत्स्नास्यसि नेत्रजैर्जलैः ।। १६ ।।**

'भद्रे' इत्यत्र पुत्रशोकसन्तप्तां प्रति कथमिदं सम्बोधनमिति चेत् तद्भ-भारत्याः शोकाभावादिति सम्प्रदायः ।।

**किमिदं स्वित्कुतो वेति देव देव न वेद्म्यहम् ।**
**सर्वतो मुखमायाति तेजः परमदारुणम् ।। २६ ।।**

'किमिदं स्वित् कुतो वेति' इत्यत्र अस्त्रज्ञस्यार्जुनस्य कथमस्त्राज्ञानम्, अस्त्रानज्ञत्वे कथं प्रत्यस्त्रप्रयोग इति चेत् सामान्यतो ज्ञानेऽपि विशेषज्ञानार्थं पृच्छतीति समाधानममवगन्तव्यम् । अत एव ज्ञातप्रश्नो भगवान् 'इदं ब्राह्ममस्त्रं द्रोणपुत्रस्य' इत्येतावन्मात्रमनुक्त्वा अधिकं ब्रवीति ।।

**संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते ।**
**आवृत्य रोदसी खञ्च ववृधातेऽर्कवह्निवत् ।। ३० ।।**

'ववृधातेऽर्कवह्निवत्' इत्यत्र युद्धकाले परस्परब्रह्मास्त्रप्रयोगे अभवन् दुरन्तः कथमिदानीमासीदिति चेत् ब्रह्मास्त्रादपि वरं ब्रह्मशिरोऽस्त्राख्यं ब्रह्मास्त्रविशेषमिति एकं समाधानम् । अश्वत्थाम्ना अनस्त्रज्ञेषु प्रयुक्तं तत्कारण-मित्यपरं समाधानम् । अत एवार्जुने 'स्वस्त्यस्तु द्रोणपुत्राय स्वस्ति मह्यं स्वस्ति प्रजाभ्यः' इत्युक्त्वा अस्त्रं प्रायोजि ।। तेनैव द्रौणेरस्त्रे प्रशान्ते स्वस्वास्त्रनिवर्तनाय श्रीकृष्णादेशाभावप्रसङ्गे अश्वत्थाम्न उपसंहाराशक्तिः न प्राकट्येत । अतः अर्जुननिष्ठब्रह्मचर्यहेतुकोपसंहारशक्तिप्रकटनाय तदस्त्रमशान्तं भगवदिच्छया । अनन्तरं भगवन्मतं ज्ञात्वा अर्जुनः अस्त्रद्वयमुपजहारेति ज्ञातव्यम् ।।

**मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुमिमं जहि ।**
**योऽसावनागसः सुप्तानवधीन्निशि बालकान् ।। ३५ ।।**

'ब्रह्मबन्धुम्' इत्यत्र 'योऽसावनागस' इत्यादि ब्रह्मबन्धुत्वे हेतुः ।।

**बन्धनं द्रविणादानं स्थानान्निर्यापणं तथा ।**

**एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः।। ५७ ।।**

बन्धनमिति । बन्धनायनेन बन्धनं, मण्याहरणेन द्रविणादानं स्वदेशान्निर्वपणेन स्थानान्निर्यापणमिति त्रयं च कृतम् ।।

**अस्मिन्नध्याये कृष्णसारथेरर्जुनस्य विजयवर्णनात् अर्थात् कृष्ण-महिमैवोक्तः ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे सप्तमोऽध्यायः**

## अथ अष्टमोऽध्यायः

**तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम् ।**

**गान्धारीं पुत्रशोकार्तां पृथां कृष्णाश्च माधवः ।। ६ ।।**

'सहानुजम्' इत्यत्र अनुज इव अनुजः सञ्जयः । 'विशेषतो धृतराष्ट्रानु-वर्ती' इति भगवत्पादोक्तेः ।।

**इति श्रीमद्भागवते प्रथमस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**अभिद्रवति मामीश शरस्तप्तायसो विभो ।**

**कामं दहतु मां नाथ मा मे गर्भो निपात्यताम् ।। १३ ।।**

'मा मे गर्भो निपात्यताम्' इत्यत्र प्रयत्नपूर्वकं गर्भरक्षणं देवस्वभावः। तद्विरोधेन गर्भपातनमासुरस्वभाव इति ज्ञातव्यम् । अत एव गर्भपातनकर्त्र्या श्राद्धपाककरणं धर्मशास्त्रेषु निषिद्धम् ।।

**सूत उवाच—**

**उपधार्य वचस्तस्याः भगवान्भक्तवत्सलः ।**
**आपाण्डवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ।। १४ ।।**

'द्रौणेरस्त्रम्' इत्यत्र पूर्वप्रयुक्तमेवास्त्रं पार्थेनोपसंहृतमपि भगवदिच्छया दत्तावकाशमिति ज्ञातव्यम् ।'वाचाऽपि निवर्तय' इति कृष्णोक्त्यनन्तरमश्वत्थाम्ना 'पञ्च पाण्डवा मुक्ताः' इत्युक्ते पुनः कृष्णेन एकस्याः सन्ततेर्निवर्तय इत्युक्ते अश्वत्थाम्ना 'भागिनेयपक्षपाती त्वम्, उत्तरागर्भ एवास्त्रं पातयामि' इत्युक्तम् । ततः कुपितेन कृष्णेन 'अभिमन्युशरीरे पातय, तद्वदहं त्वत्प्रयुक्तास्त्रं व्यर्थीकरिष्यामि । सहस्रवर्षपर्यन्तं पाण्डवसन्ततिं रक्षामि' इति प्रत्युक्तम् । तदनुसारेण उत्तरागर्भे अस्त्रपातनं कृष्णेन परिरक्षणमित्यवगन्तव्यम् ।।

**व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनाम् ।**
**सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः।। १६ ।।**

'सुदर्शनेन स्वास्त्रेण स्वानां रक्षाम्' इत्यत्र सुदर्शनाख्यचक्ररूपस्वास्त्रेण स्वानां पाण्डवानां रक्षां चकार । उत्तरागर्भे तु 'भ्रामयन्तं गदां मुहुः' इत्युक्तरीत्या कृष्णेन भ्रामितैवगदा अलातचक्रवत् परिदृश्यमाना सुदर्शनमिति क्वचिदुक्तेति सम्प्रदायः ।।

**विषान्महाग्नेः पुरुषाददंशना-**
**दसत्सभायाः वनवासकृच्छ्रतः ।**
**मृधे मृधेऽनेकमहारथास्त्रतो**
**द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ।। २७ ।।**

'विषान्महाग्नेः' इत्यत्र कुन्त्या श्रीकृष्णकृतोपकारः स्मृतः । इयमेव सख्यभक्तिर्नाम या भगवत्कृतोपकारस्मृतिः ।।

अस्मिन्नध्याये कृष्णेनोत्तरागर्भपरिरक्षणरूपं महत्वं वर्णितम् । कुन्तीस्तोत्रव्याजेन भगवन्महिमैव वर्णितः ।।

**इति श्रीमद्भागवते प्रथमस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**तान्समेतान् महाभाग उपलभ्य वसूत्तमः ।**
**पूजयामास धर्मज्ञो देशकालविभागवित् ।। १६ ।।**

'वसूत्तमः' इत्यत्र ब्रह्मावेशबलात् तात्कालिकमुत्तमत्वं ध्येयम् । अन्यथा 'वसूनां पावकश्चास्मि' इत्यनेन विरोधात् ।।

**भीष्म उवाच—**

**अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनन्दन ।**
**जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ।। १९ ।।**

'अहो अन्याय'मिति लोकदृष्ट्योक्तम् । वस्तुतः अकारशब्दवाच्यविष्णोः न्यायादनपेतम् ।।

**विशुद्धया धारणया धुताशुभ-**
**स्तदीक्षयैवाशु गतायुधव्यथः ।**
**निवृत्तसर्वेन्द्रियवृत्तिविभ्रमः**
**तुष्टाव जल्पं विसृजञ्जनार्दनम्।। ३८ ।।**

'गतायुधव्यथः' इत्यत्र धर्मबोधनार्थं कृष्णेन चोदितो भीष्म आह- 'अर्जुनबाणाः आपादमौलिपर्यन्तम् अङ्गुल्यन्तरमपि विहाय लग्नाः, तीव्रवेदनया नोत्तरं दातुं शक्नोमि' इति । तदा भगवान् 'अहं वेदनां शमयामि' इत्युक्तवान् । श्वोभूते वेदनाविषये पृष्टो भीष्म आह 'न किञ्चिद् वेदना अनुभूयते ।

सर्वाणीन्द्रियाणि प्रफुल्लानि । कामं पृच्छतु धर्मराजः । उत्तरं वदिष्यामि' इति भारतोक्तमनुसन्धेयम् ।।

**स्वनियममपहाय मत्प्रतिज्ञा-**
**मृतमधिकर्तुमवप्लुतो रथस्थः ।**
**धृतरथचरणोऽभ्ययाद् बलाग्रे**
**हरिरिव हन्तुमिमं गतोत्तरीयः।। ४४ ।।**

'धृतरथचरणोऽभ्ययात्' इत्यत्र हन्तुमिव चक्रपाणिरभीयायेति द्रष्टव्यम्।। हननमिष्टं चेत् उपविष्टस्थलादेव चक्रं प्रायुक्ष्यत । चक्रं धृत्वा अभिगमनं किमर्थमिति ।।

**शितविशिखहतो विशीर्णदंसः**
**क्षतजपरिप्लुत आततायिनो मे ।**
**प्रसभमभिससार मद्वधार्थं**
**स भवतु मे भगवान् मुदे मुकुन्दः ।। ४५ ।।**

'विशीर्णदंश' इति विप्रिय इतिवत् अशीर्णदंश इत्यर्थः । विलसत्कवचे इति पूर्वमुक्तत्वात् विशीर्णे सति कथं विलसत्त्वम् ।।

**सूत उवाच—**

**कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ।**
**आत्मन्यात्मानमाविश्य सोऽन्तःश्वास उपारमत्।। ५१ ।।**

'आत्मन्यात्मानमावेश्य' इत्यत्र भगवति मनःप्रवेशः पूर्वक्षणवर्ती इति ल्यपा आह । देहत्यागक्षणे स्वमूलरूपचिन्तनेन वसुलोकप्राप्त्युक्तेः । तत्क्षणे आत्मनि स्वस्वरूप एव आत्मानं मनः स्थापयन् देहं तत्याज ।।

**तस्य निर्हरणादीनि सम्परेतस्य भार्गव ।**
**युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ।। ५४ ।।**

'युधिष्ठिरः कारयित्वा' इत्यत्र पट्टाभिषेकस्य राज्ञो निर्हरणाद्यधिकाराभावात् भीमादिभिः कारयित्वेत्यर्थः ।।

**अस्मिन्नध्याये भीष्मस्तुतिरूपेण कृष्णमहिमा अनुवर्णित इति द्रष्टव्यम् ।।**

**।। इति श्रीमद्भागवते प्रथमस्कन्धे नवमोऽध्यायः ।।**

## अथ दशमोऽध्यायः

**सूत उवाच—**

**वंशं कुरोर्वंशदवाग्निनिर्हृतं**
**संरोहयित्वा भवतापनो हरिः ।**
**निवेशयित्वा निजराज्य ईश्वरो**
**युधिष्ठिरं प्रीतमना बभूव ह ।। २ ।।**

'प्रीतमना बभूव' इत्यत्र नित्यप्रीतोऽपि प्रीतिमभिव्यक्तवानित्यर्थः ।।

**सितातपत्रं जग्राह मुक्तादामविभूषितम् ।**
**रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य हि ।। १८ ।।**

'सितातपत्रं जग्राह' इत्यादि । महाभारतोक्तदिशा धर्मराज एव रश्मीन् जग्राह इत्यपि द्रष्टव्यम् ।।

**अस्मिन्नध्याये कृष्णभक्तस्य धर्मराजस्य राज्यवैभववर्णनात् कौरवस्त्रीवचनव्याजेन कृष्णमहिमावर्णनात् श्रीकृष्णप्रयाणस्य द्वारकायां**

**कृतस्य सत्कारस्य च वर्णनात् भगवन्महिमातिशय एव वर्णितो ज्ञातव्यः ।।**

**।। इति श्रीमद्भागवते प्रथमस्कन्धे दशमोऽध्यायः ।।**

## अथ एकादशोऽध्यायः

**परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।**
**अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ।**
**विधमन्तं सन्निकर्षे पर्यैक्षत क इत्यसौ ।। १० ।।**

'पर्यैक्षत क इत्यसौ' इत्यत्र परितः ईक्षणात् परीक्षिदिति नामेत्यवगन्तव्यम् ।।

**अस्मिन्नध्याये विष्णुना दत्तत्वात् विष्णुरात इति नामवतः परीक्षितो महाभागवतस्य जातकवर्णनव्याजेन विष्णुभक्तानां वैभवो वर्णित इति भगवन्निष्ठता ज्ञेया ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे एकादशोऽध्यायः**

## अथ द्वादशोऽध्यायः

**पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून् ।**
**अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ।। ३४ ।।**

'अरक्षतां व्यसनतः' इत्यत्र यद्यपि धृतराष्ट्रो दुष्पुत्रवशो भूत्वा नानापराधान् कृतवान् । तथापि तद्विस्मृत्य तत्कृतरक्षणभागमेव आदाय एवं वदतो धर्मराजस्य क्षमागुणोऽवगन्तव्यः ।।

**अस्मिन्नध्याये विदुरोपदेशे नारदोपदेशे च भगवद्भक्तिसाधनवैराग्यबोधनात् भगवन्निष्ठता वेद्या ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे द्वादशोऽध्यायः**

## अथ त्रयोदशोऽध्यायः

अस्मिन्नध्याये भगवतो लोकत्यागेनोत्पातानां वर्णनात् धर्मराज-कृतकुशलप्रश्नव्याजेन च कृष्णमहिमावर्णनाद्भगवन्निष्ठता ज्ञेया ।।

**इति श्रीमद्भागवते प्रथमस्कन्धे त्रयोदशोऽध्यायः**

## अथ चतुर्दशोऽध्यायः

तद्वै धनुस्त इषवः स रथो हयास्ते
सोऽहं रथी नृपतयो यत आमनान्ति ।
सर्वं क्षणेन तदभूदसदीशरिक्तं
**भस्मन्हुतं कुहकराद्धमिवोप्तमूषे ।। २१ ।।**

'स रथो हयास्ते' इत्यत्र 'त इषव' इतिवत् तत्सदृशो रथः तत्सदृशा हया इत्यर्थः । 'तद्वै धनुः' इत्यत्र तु वैशब्दप्रयोगात् 'सोऽहम्' इत्यत्र प्रत्यभिज्ञानात् तदेव धनुः, स एवाहमर्जुन इत्यर्थो बोध्यः ।।

अस्मिन्नध्याये पार्थवचनव्याजेन भगवन्महिमैव बहु वर्णितम् ।।

**इति श्रीमद्भागवते प्रथमस्कन्धे चतुर्दशोऽध्यायः**

## अथ पञ्चदशोऽध्यायः

वाचं जुहाव मनसि तत्प्राण इतरे परम् ।
**धृत्या ह्यपानं सोत्सर्गं तत्परत्वे ह्यजोहवीत् ।। १० ।।**

त्रित्वे हुत्वाऽथ पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः ।
**सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ।। ११ ।।**

'वाचं जुहाव' इत्यत्र वागभिमानिनी उमा मनोभिमानिनि रुद्रे विलीयते । सः प्राणे, प्राणः अपाने, अपानो व्याने, समानोदानौ व्याने, अथवा प्राणापानव्यानेषु, तं मुख्यप्राणे, तं हृदि स्थिते विष्णौ, तमेकांशेन सर्वगते ब्रह्मणि इत्येवं लयचिन्तनसङ्क्षेपः ।।

**अस्मिन्नध्याये भगवत्प्रयाणमनु पाण्डवप्रयाणवर्णनात् ब्रह्मप्राप्ति-साधनलयचिन्तनवर्णनात् भगवन्निष्ठत्वं ज्ञेयम् ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे पञ्चदशोऽध्यायः**

## अथ षोडशोऽध्यायः

**अस्मिन्नध्याये महाभागवतस्य परीक्षितः वृत्तान्तस्य कथनान्, श्रीकृष्णभूत्यागेन भूधर्मयोः दुःखप्राप्तिवर्णनात्, धरावचने श्रीनिवासगुणगणवर्णनाच्च भगवन्निष्ठता ज्ञेया ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे षोडशोऽध्यायः**

## अथ सप्तदशोऽध्यायः

**अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ।**
**विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ।। ४० ।।**

'विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः' इत्यत्र कलिः धर्मशीलं राजानं गुरुं चाविश्य अधर्मप्रभवो भवतीति सूचितम् ।। अतः राज्ञा गुरुणा च सावधानेन भवितव्यमिति ।।

**अस्मिन्नध्याये भगवत्कलाधरस्य राज्ञो कलिनिग्रहवर्णनेन भगवन्निष्ठता ज्ञेया ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे सप्तदशोऽध्यायः**

## अथ अष्टादशोऽध्यायः

**तावत्कलिर्न प्रभवेत् प्रविष्टोऽपीह सर्वतः ।**
**यावदीशो महानुर्व्यामाभिमन्यव एकराट् ।। ५ ।।**

'तावत् कलिः न प्रभवेत्' इत्यत्र धर्मराजकाल एव भीमसेनेन निगृहीतः कलिः धर्मराजशासनात् मेरुगुहायामवसत् । पाण्डवस्वर्गारोहणानन्तरं पुनरागतः पुनः परीक्षिता निगृहीतः तद्दत्तस्थल एव वसन्नपि स्वशक्तिप्रकटनसमर्थो नाभवत् । परीक्षित अनन्तरं क्षेमकपर्यन्तं नातिवृद्धः । तदनन्तरं सम्यक् स्वशक्तिप्रकटनसमर्थः अभवदिति ज्ञातव्यम् ।।

**नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ।**
**कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत्।। ७ ।।**

'सारङ्ग इव सारभुक्' इत्यत्र दुर्गुणपूर्णे कलौ सारमात्राभावेऽपि तदभिमन्यमानकाले 'कुशलान्याशु सिद्ध्यन्ति' इति उत्तरार्धोक्तसारत्वस्य सद्भावात् सारङ्गदृष्टान्तो युज्यते ।।

**स वै महाभागवतः परीक्षि-**
**द्येनापवर्गाख्यमदभ्रबुद्धिभिः ।**
**ज्ञानेन वैयासकिशब्दितेन**
**भेजे खगेन्द्रध्वजपादमूलम् ।। १७ ।।**

'भेजे खगेन्द्रध्वजपादमूलम्' इत्यनेन परीक्षितः एतच्चरमजन्मेति, 'अप्रतीकालम्बननान् परं नयति' इति भाष्यदिशा तस्य अप्रतीकालम्बनत्वं च सूचितम् ।। 'राज्ञां च शतमुद्दिष्टम्' इति भाष्योक्तानां व्याप्तदर्शिनां मध्ये परीक्षिदपि एक इति ज्ञातव्यम् ।।

**अथापि यत्पादनखावसृष्टं**
**जगद्विरिञ्चोपहृतार्हणाम्भः ।**
**सेशं पुनात्यन्यतमो मुकुन्दात्**
**को नाम लोके भगवत्पदार्थः ।। २१ ।।**

'अथापि यत्पादनखावसृष्टम्' इत्यत्र पादप्रक्षालको ब्रह्मा । पादोदकं शिरसा धृतवान् शिवः, प्रक्षालितपादो विष्णुरिति त्रिमूर्तीनां मध्ये विष्णोरेवोत्कृष्टत्वमुक्तं भवति । तदुक्तं श्रीमद्वादिराजपूज्यचरणैः 'कालु तोळेदवनोब्ब, तोळेसि कोण्डवनोब्ब' इति 'लक्ष्मीशोभन'पदे ।।

**अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ।**
**ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ।। २९ ।।**

'क्षुत्तृड्भ्याम्' इत्यत्र मन्युमत्सरकारणमुक्तम् । अनेन यत्केनचिदुक्तं 'परीक्षिता कलये जातरूपमेकं स्थानं दत्तम् । परीक्षिद्धृतकिरीटं सुवर्णात्मकम् । तत्र स्थितः कलिः तद्बुद्धिविपर्यासं कृतवान्' इति । तदनेन निरस्तम् । 'तावत् कलिर्न प्रभवेत्' इति वदन् भागवताचार्यः कथं स्ववाक्यविरुद्धम् अभिप्रैति इति च ।।

**स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा ।**
**विनिर्गच्छन् धनुष्कोट्या निधाय पुरमागमत् ।। ३० ।।**

'धनुष्कोट्या' इत्यत्र राज्ञा अस्थिमतः प्राणिनः स्पर्शनं न कार्यमिति धनुष्कोट्या निहितम् इति ज्ञातव्यम् ।।

**तस्य पुत्रोऽतितेजस्वी विहरन् बालकोऽर्भकैः ।**
**राज्ञाऽघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ।। ३२ ।।**

'तस्य पुत्र' इत्यत्र श्रृङ्गिनामा ऋषिपुत्रः स्ववयस्यैः क्रीडमानः कस्मिंश्चिद्विवादे सति वयस्यैः 'गृहं गत्वा पश्य, तव तातस्य कण्ठे मृतसर्पो लग्नः' इति कोपितः शशापेति महाभारती कथा अनुसन्धेया । तदनुसारेणात्रापि शापदानानन्तरं स्वाश्रमगमनं वर्णितम् ।।

**ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः ।**
**स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हसि।। ३४ ।।**

'द्वारपालो निरूपितः' इत्यत्र क्षत्रियोऽपि द्वारि स्थित्वा अनुज्ञां प्राप्य अन्तः प्रविशेत् । तादृशः स्वेच्छया अन्तः प्रविश्य आक्रमं कृतवान् इति दण्ड इति भावः ।। कोपवशात् क्षत्रबन्धुरिति प्रयोगः । यथा श्वेतकेतुना प्रवाहणे प्रायोजि ।।

**इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः ।**
**स्वयं विप्रकृतो राज्ञा नैवाऽघं तदचिन्तयत् ।। ४९ ।।**

'स्वयं विप्रकृतो राज्ञा' इत्यनेन शमीकस्य क्षमागुणो दर्शितः ।।

**अस्मिन्नध्याये महाभागवतपरीक्षितच्चरित्रवर्णनात् सूतवचने भगवन्महिमावर्णनात् त्रिशंद्भागवतधर्ममध्यपतितक्षमाख्य-धर्म-वर्णनाच्च भगवन्निष्ठत्वं ज्ञेयम् ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे अष्टादशोऽध्यायः**

## अथ एकोनविंशोऽध्यायः

**इति स्म राजा व्यवसाय युक्तः**
**प्राचीनकाग्रेषु कुशेषु धीरः ।**

**उदङ्मुखो दक्षिणकूल आस्ते**
**समुद्रपत्न्यास्स्वसुते न्यस्तभारः ॥ १७ ॥**

'दक्षिणाकूले' इत्यत्र दक्षिणातीरसमीप इत्यर्थः । नौस्तीरे अस्तीत्युक्ते यथा तथा ॥

**एवं च तस्मिन्नरदेवदेवे**
**प्रायोपविष्टो दिवि देवसङ्घाः ।**
**प्रशस्य भूमौ व्यकिरन् प्रसूनै-**
**र्मुदा मुहुर्दुन्दुभयश्च नेदुः ॥ १९ ॥**

'व्यकिरन् प्रसूनैः' इत्यत्र देशकालोचितपरीक्षिद्व्यापारं प्रसूनवृष्ट्या अन्वमोदन्नित्यर्थः ॥

**न वा इदं राजर्षिवर्य चित्रं**
**भवत्सु कृष्णं समनुव्रतेषु ।**
**येऽध्यासनं राजकिरीटजुष्टं**
**सद्यो जहुर्भगवत्पार्श्वकामाः ॥ २१ ॥**

'येऽध्यासनम्' इत्यत्र कृष्णत्यक्ता भूमिरस्माभिरपालनीया इति यः समयः पाण्डवैः कृतः तदनुसारेण कृष्णस्य भूमित्यागात् समनन्तरमेव सप्तद्वीपवर्तीं महीं त्यक्त्वा श्रीकृष्णमनुसस्रुः इत्यहो पाण्डवानां वैराग्यम् । तद्वंशजातस्य परीक्षितः प्रायोपवेशः नाश्चर्य इति भावः ॥

**अस्मिन्नध्याये भगवद्भक्तिदार्ढ्यहेतुभूतवैराग्याख्यभागवतधर्म-वर्णनात् परीक्षिता प्रायोपवेशार्थं भगवत्पदीभूतगङ्गाया एव वृतत्वात् भगवन्महिमावर्णन एव तात्पर्यम् इति ज्ञातव्यम् ॥**

**इति श्रीमद्भागवते प्रथमस्कन्धे एकोनविंशोऽध्यायः**

# अथ विंशोऽध्यायः

सूत उवाच—

**तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ।**
**अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः।। १ ।।**

‘तत्राभवत्’ इत्यनेन श्रीशुकः यदृच्छया तद्दिने तत्राभवत् , नतु तदर्थं तत्राजगाम इति सूचितम् ।।

**तं व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ।**
**चार्वायताक्षोन्नसतुल्यकर्णं सुभ्र्वाननं कम्बुसुजातकण्ठम्।।२**

‘तं द्व्यष्टवर्षम्’ इत्यादि श्रीशुकध्यानार्थं वर्णितम् । ‘आपादमौलिपर्यन्तं गुरूणामाकृतिं स्मरेत्’ इत्युक्तेः ।।

**अतः पृच्छामि संसिद्धं योगिनां परमं गुरुम् ।**
**पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वदा ।। १३ ।।**

‘म्रियमाणस्य’ इत्यस्य मरणशीलस्येत्यर्थः । मरणशय्यायां स्थितस्य कार्याक्षमत्वात् सर्वदा यत्कार्यमिति पृष्ठत्वाच्चेदमवसेयम् ।।

**अस्मिन्नध्याये भागवताचार्यस्य आपादमौलिवर्णनात् तादृश-भागवतसङ्गस्य दुर्लभत्ववर्णनात् परीक्षित्प्रश्नव्याजेन भगवज्जिज्ञासैव कार्या इत्युक्तेश्च भगवन्निष्ठत्वं ज्ञेयम् ।।**

**इति श्रीमद्भागवते प्रथमस्कन्धे विंशोऽध्यायः**

## ।। इति श्रीप्रथमस्कन्धगतप्रमेयसङ्ग्रहः ।।

**।। श्रीकेशवार्पणमस्तु ।।**

# अथ द्वितीयः स्कन्धः

## अथ प्रथमोऽध्यायः

**खट्वाङ्गो नाम राजर्षिः ज्ञात्वेयत्तामिहायुषः ।**
**मुहूर्तात्सङ्गमुत्सृज्य गतवानभयं हरिम् ।। १३ ।।**

'मुहूर्तात् सङ्गमुत्सृज्य' इत्यस्य संवादी 'मुहूर्तमपि यो ध्यायेत् नारायणमतन्द्रितः । सोऽपि सिद्धिमवाप्नोति किं पुनस्तत्परायणः' इति कृष्णामृतमहार्णवस्थश्लोकः ।।

**आण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते ।**
**वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः ।। २५ ।।**

'सप्तावरणसंयुते' इत्यत्र पञ्चभूताहङ्कारमहत्तत्वाख्यसप्तावरणानि । क्वचित् नवावरणानि कथ्यन्ते । तत्र 'अबग्नीरनभोहङ्कृन्महत्तत्वगुणत्रयैः' इति भगवत्पादोक्तिः प्रमाणम् । गुणत्रयावरणेमेकमिति कृत्वा भगवत्पादोक्तिरपि सप्तावरणपरत्वेन व्याख्यातुं शक्यते । सुवर्णात्मकब्रह्माण्डखर्परमेव पृथिव्यावरणिति ध्येयम् ।।

**पातालमेतस्य हि पादमूलं**
**पठन्ति पार्ष्णिप्रपदे रसातलम् ।**
**महातलं विश्वसृजस्सुगुल्फौ**
**तलातलं वै पुरुषस्य जङ्घे ।। २६ ।।**

'पातलमेतस्य हि पादमूलम्' इत्यत्र पातालं पादमूलादुत्पन्नं तदाश्रितं विराड्रूपिहरेः प्रतिमाभूतस्य ब्रह्माण्डस्य पादस्थानीयमिति ज्ञेयम् । एवं चतुर्दशलोकविन्यासोऽपि ।।

अस्मिन्नध्याये भगवद्भक्तिसाधनभूतवैराग्योपदेशात् स्फुटं विराड्रूप-वर्णनाच्च भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते द्वितीयस्कन्धे प्रथमोऽध्यायः**

## अथ द्वितीयोऽध्यायः

**अतः कविर्नामसु यावदर्थः**
**स्यादप्रमत्तो व्यवसायबुद्धिः ।**
**सिद्धेऽन्यथार्थे न यतेत तत्तत्**
**परिश्रमं तत्र समीक्षमाणः ।। ३ ।।**

'अतः कविर्नामसु' इत्यत्र मौनाख्यो भागवतधर्मः अभिहितः ।।

**सत्यां क्षितौ किं कशिपोः प्रयासै-**
**र्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ।**
**सत्यञ्जलौ किं पुरुपर्णपात्रै-**
**र्दिग्वस्त्रलाभे सति किं दुकूलैः ।। ४ ।।**

'सत्यां क्षितौ' इत्यत्र परिपक्वयोगिनां मार्गो दर्शितः । वात-रशनानामञ्जलिपुटेन पानमुचितम् । इतरेषां निषिद्धमिति ज्ञातव्यम् ।।

**चीराणि किं पथि न सन्ति दिशन्ति भिक्षां**
**नो वाऽङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।**
**रुद्धा गुहाः किमवधूतसुहृन्न कृष्णः**
**कस्माद्भजन्ति कवयो धनदुर्मदान्धान् ।। ५ ।।**

'चीराणि किं' इत्यत्र पक्वयोगिनां मार्गो दर्शितः ।।

**स सर्वविद् ह्यनुभूश्च सर्व**
**आत्मा यथा सुप्तजनेक्षितैकः ।**
**तं सत्यमानन्दनिधिं भजेत**
**सर्वात्मनाऽतोन्यत आत्मघातः ॥ ७ ॥**

'तं सत्यमानन्दनिधिम्' इत्यत्र 'सच्चिदानन्द आत्मेति ब्रह्मोपासा विनिश्चिता' 'ओं आनन्दादयः प्रधानस्य ओं' इत्युक्ता चतुर्गुणोपासना विहिता ॥

**केचित्स्वदेहान्तर्हृदयावकाशे**
**प्रादेशमात्रं पुरुषं वसन्तम् ।**
**चतुर्भुजं कञ्जरथाङ्गशङ्ख-**
**गदाधरं धारणया स्मरन्ति ॥ ९ ॥**

'केचित् स्वदेह' इत्यादिना सूक्ष्मरूपोपासनोक्ता । यथा खलु अक्षराभ्यासं कुर्वाणा बालकाः प्रथमं स्थूलाक्षराणि लिखित्वा अनन्तरं सूक्ष्माक्षराणि लिखन्त्येवं स्थूलरूपोपासनानन्तरं सूक्ष्मरूपोपासनासौकर्यमिति गुरुपादाः ॥

काचिदप्युपासना भक्तिपूर्विकैव फलप्रदा । भक्तिदार्ढ्यं च वैराग्यायत्तमिति उपासनाद्वयमध्ये वैराग्यस्तुतिः प्रवेशिता ॥

**न यत्र कालोऽनिमिषां परः प्रभुः**
**कुतो नु देवा जगतां य ईशिरे ।**
**न यत्र सत्वं न रजस्तमश्च**
**न वै विकारो न महान्प्रधानम् ॥ १८ ॥**

'न यत्र सत्वम्' इत्यत्र रजस्तमोमिश्रं सत्वमित्यर्थः । शुद्धसत्वस्य विद्यमानत्वात् ॥ अत्र विष्णुरहस्यं प्रमाणम् ॥ टीकाकारास्तु यद्यपि

त्रिगुणात्मिका प्रकृतिर्विभुत्वात् वैकुण्ठेऽपि वर्तते । तथापि सा नैव बन्धिकेत यविद्यमानप्रायेत्याहुः । तत्सर्वैः शिरसा माननीयमेव ।।

**इत्थं मुनिस्तूपरमेद् व्यवस्थितो**
**विज्ञानदृग् वीर्यसुरन्धिताशयः ।**
**स्वपार्ष्णिनाऽऽपीड्य गुदं ततोऽनिलं**
**स्थानेषु षट्सून्नमयेज्जितक्लमः ।। २० ।।**

'षट्सून्नमयेत् 'इत्यत्र मूलाधारस्थितं वायुं क्रमेण स्वाधिष्ठान-मणिपुर-अनाहत-विशुद्ध-आज्ञा-सहस्रारारव्यचक्रेषु ऊर्ध्वं गमयेदिति भावः ।।

**नाभ्यां स्थितं हृद्यवरोप्य तस्मा-**
**दुदानगत्योरसि तं नयेन्मुनिः ।**
**ततोऽनुसन्धाय धिया मनस्वी**
**स्वतालुमूलं शनकैर्नयेत ।। २१ ।।**

'नाभ्यां स्थित'मिति 'तस्मात् भ्रुवोः' इति श्लोकद्वयस्य व्यारव्यानेषु नाभ्यादिस्थितकमलदलानां सङ्ख्या विभिन्ना निर्दिष्टा दृश्यते । भगवत्पादैः

'मूले च नाभौ हृदयेन्द्रयोनिभ्रूमध्यमूर्धद्विषडन्तकेषु ।

चतुः षडष्टद्विचतुर्द्विषट्कदलेषु पद्मेषु सितारुणेषु' इत्युक्तम् ।

गरुडपुराणे मुक्तितत्वे च नाडीस्थकमलवर्णनमुपलब्धम् आपाततः भगवत्पादोक्तिविरुद्धं दृश्यते । भगवत्पादैः तत्र तत्र प्रमाणेषूक्तानि सर्वाणि सङ्गृहीतानि । भगवत्पादानुग्रहविशेषेण दलसङ्ख्यासमन्वयक्रमः प्रदर्श्यते ।।

मूलाधारे चतुर्दलकमलम् । अत्र विप्रतिपत्तिर्नास्ति ।।

नाभौ षट्दलकमलमिति पठ्यते । तत्रायं विवेकः । नाभेः द्व्यङ्गुलाधःप्रदेशे

स्वाधिष्ठाने षड्दलकमलम् । नाभिस्थाने मणिपुरे दशदलकमलम् । भगवत्पादोक्तौ नाभौ इत्येतदावर्तनीयम् । 'चतुः षट्' इत्यत्र नित्यानित्येत्यत्रेव चतुः, षट्, चतुश्षट् इति योगविभागः । तथाच मूले चतुः, नाभौ । सामीप्ये सप्तमी । नाभिसमीपे षट् , नाभौ चतुःषट् मिलित्वा दशेति लभ्यते ।।

हृदये अष्टदशकमलम् । अत्रापि विप्रतिपत्तिर्नास्ति । इदानीमुपलब्धे विजयध्वजीये हृदये दशदलकमलमिति पठ्यते । स लेखकप्रमाद इति मन्यामहे । कुत्रापि प्रमाणेषु हृदयकमलस्य दशदलत्वानुक्तेः ।। अथवा प्रचलितविजयध्वजीये उच्छिन्नं किञ्चित् प्रपूर्य पठितव्यम् । तथाच उदानगत्या ब्रह्मनाड्या नाभौ दशदलपद्मे अवरोप्य ततो दशदलपद्मात् हृदि अष्टदलपद्मे अवरोप्य सन्निधाप्य ततः अष्टदलपद्मात् तं उरसि इत्यादि पठितव्यमिति भाति ।। अत्र महान्तः प्रमाणम् ।। यथाशक्तिसंशोधनेन भागवतप्रतिपाद्यः श्रीकृष्णः प्रीयात् ।।

'अष्टपत्रे तु हृत्पद्मे' इति यतिप्रणवोक्तं प्रत्यहमनुसन्दधानो विजयध्वज-यतिवरः कथं हृदि दशदलपद्ममिति वदेत् । अतः कश्चन लेखकप्रमाद एव ऊहनीयः ।।

उरसि अनाहते द्वादशकमलम् । अत्रापि विप्रतिपत्तिर्नास्ति । किन्तु श्रीमदाचार्यैर्नोक्तमिति भाति । तन्न । हृदि इत्येत् सामीप्ये सप्तमी इति व्याख्याय चतुःषडष्टेत्यत्र चतुरष्टेति विभागं कृत्वा मिलित्वा द्वादशदलानि सम्पादयितुं शक्यन्ते ।।

तालुमूले विशुद्धे षोडशदलकमलम् । एतद्भगवत्पादोक्तौ नोक्तमिति न मन्तव्यम् । अष्ट-द्वि इति विभागेन षोडशत्वसम्पादनस्य सुशकत्वात् ।।

किञ्चित् तदुपरि ताल्वपरपर्यायेन्द्रनाभौ द्विदलकमलं भगवत्पादोक्तं तन्त्रसारव्याख्यानादवगम्यते ।।

भ्रूमध्ये भगवत्पादवचनेन चतुर्दलकमलम् । तत्रैव किञ्चिदन्तरे मुक्तितत्वाद्युक्तप्रकारेण आज्ञायां द्विदलकमलम् । 'द्विषट्क' इत्यत्र 'द्वि' इति विभज्य इदं सम्पादनीयम् ।।

शिरसि द्वादशदलकमलं 'द्विषडि'ति आचार्यवचनलब्धमन्यत्राप्युक्तम् ।।

सहस्रारे सहस्रदलकमलमन्यत्रोक्तं कथञ्चिद् भगवत्पादोक्त्याऽपि योजनीयमिति भाति ।।

अनयैव दिशा 'त्रिकोणवह्नौ च षडस्रवायौ द्विस्तावदस्त्ररविवृत्तशशि-त्रिवह्नौ । वृत्ते विधावपि' इति भगवत्पादोक्तिरपि मुक्तितत्वाद्युक्तसकलचक्र-सङ्ग्राहकतया व्याख्यातुं शक्यते ।।

**तस्माद् भ्रुवोरन्तरमुन्नयेत**
**निरुद्धसप्ताश्वपथोऽनपेक्षः ।**
**स्थित्वा मुहूर्तार्धमकुण्ठदृष्टि-**
**र्निर्भिद्य मूर्धन्विसृजेत्परं गतः।। २२।।**

'निरुद्धसप्ताश्वपथ'इत्यत्र भ्रूमध्यात् नाड्यः कर्णद्वयाक्षिद्वयनासिकाद्वयमुखाख्यसप्तद्वारान् प्रति गच्छन्ति । अतः तन्मार्गे यथोदानवायुर्न गच्छति तथा सावधानो भूत्वोर्ध्वं नयेदिति भावः ।। त्वरायाममार्गे वायुसञ्चारः स्याद् वा । अतः त्वरानिराकरणार्थं स्थित्वा मुहूर्तार्धमित्युक्तम् इति ज्ञेयम् ।। २२ ।।

**योन्तः पचति भूतानां यस्तपत्यण्डमध्यगः ।**
**सोऽग्निर्वैश्वानरो मार्गो देवानां पितृणां मुनेः ।। २६ ।।**

'सोऽग्निर्वैश्वानरो मार्ग' इत्यत्र ब्रह्मयानदेवयानपितृयानाख्यमार्गत्रयेणापि गच्छतां वैश्वानरप्राप्तिरस्ति । अतः स मार्ग इति कथित इति भावः ।।

**देवयानं पिङ्गलाभिरहान्येति शतायुषा ।**
**रात्रीरिडाभिः पितॄणां विषुवत्तां सुषुम्नया ।। २७ ।।**

देवयानमित्यादि । देहदक्षिणभागस्थाः पिङ्गलनाड्यः वामभागस्थाः इडानाड्यः । मूलाधारं समारभ्य आमूर्धानमृजुस्थिता । मध्ये सुषुम्ना विज्ञेया । पिङ्गलानाडीभ्य उत्क्रान्ता देवयानेन, इडानाडीभ्य उत्क्रान्ता पितृयानेन, सुषुम्नानाड्या उत्क्रान्ता ब्रह्मयानेन गच्छन्ति । पिङ्गाख्य-सुखप्रदत्वात् देवयानं पिङ्गलाख्यम् । इडाख्यान्नदानात् पितृयानमिडाख्यम् । विशेषेण सुखप्रदत्वात् ब्रह्मयानं विषुवं स्मृतम् ।।

**विज्ञानतत्वं गुणसन्निरोधं**
**तेनात्मनाऽऽत्मानमुपैति शान्तिम् ।**
**आनन्दमानन्दमयोऽवसाने**
**सर्वात्मके ब्रह्मणि वासुदेवे ।। ३४ ।।**

ततो विशेषमित्यादि ।। अत्रेदं तत्वम् । ब्रह्माण्डं सप्तावरणं नवावरणं वेति पूर्वत्रोक्तम् । एतानि नवावरणानि अन्नमयादिपञ्चकोशान्तर्गतानि । चतुर्विंशतितत्वान्यपि तेष्वन्तर्गतानि । तत्प्रकारः अस्मत्कृतसृष्टिविलासा-दवगन्तव्यः ।।

लयकाले एतानि 'आकाशाद् वायुः' इत्याद्युक्तसृष्ट्यपेक्षया व्युत्क्रमेण लीयन्ते । 'भूतं भूताभिमानी च तद्देहोऽन्तर्नियामकः' इत्युक्तप्रकारेण चतुः-प्रकारकसृष्ट्यपेक्षयाऽपि व्युत्क्रमेण लयः अवगन्तव्यः । आकाशपर्यन्तभूत-लयानन्तरं आकाशः अहङ्कारतत्वे, तत् महत्तत्वे, तच्च त्रिगुणात्मकाव्यक्ततत्वे च लीयते । तन्मार्गेण गच्छन् ज्ञानी तत्तद्देवताद्वारा तत्तद्गतविरिञ्चं तदन्तर्गतहरिं च प्राप्नोति । एतदभिप्रेत्य तैत्तिरीये 'एतमन्नमयमात्मनमुपसङ्क्रम्य' इत्याद्युक्तम् । एवमानन्दमयप्राप्तिमुक्त्वा ततः परं 'सर्वात्मके ब्रह्मणि वासुदेवे' इत्युक्तम् ।।

अत्रेदमवगन्तव्यम् । अनिरुद्धाद्यावरणानि सन्ति । तानि च मूलरूपनारायणादभिव्यक्तानि तात्पर्यनिर्णयाद्याध्यायोक्तप्रकारेण ज्ञातव्यानि ।।

आनन्दमयप्राप्त्यनन्तरं ज्ञानी सह तेनानिरुद्धादिभगवद्रूपाण्यपि प्राप्नोति । एवं गच्छन् वासुदेवपर्यन्तं गत्वा वासुदेवं प्रविशति । वासुदेवतरणं नास्ति । वासुदेवावरणमतिक्रम्य न गच्छति इति भावः ।।

एतदभिप्रेत्यैव छान्दोग्यभाष्ये वासुदेवप्रवेश एवोक्तो नतु वासुदेवतरणम् । तेन वासुदेवातिक्रमणाभावे कथमानन्दमयनारायणप्राप्तिरिति शङ्कानवकाशः ।। आनन्दमयकोशान्तःस्थितविज्ञानमयकोशगतवासुदेवातिक्रमेण नारायणप्राप्तेः सद्भावात् । वासुदेवानतिक्रमणवचनस्य प्रथमव्यूहगतवासुदेवाभिप्रायादिति ।।

एतदपि रहस्यं प्रमेयं गुरुमुखात् सम्यगवगन्तव्यम् । सर्वथा पुत्रान् शिष्यान् विनाऽन्येभ्यो न प्रकाशनीयम् ।।

**पिबन्ति ये भगवत आत्मनः सतां**
**कथामृतं श्रवणपुटेषु सम्भृतम् ।**
**पुनन्ति ते विषयविदूषिताशयं**
**व्रजन्ति तच्चरणसरोरुहान्तिकम् ।। ४० ।।**

'व्रजन्ति तच्चरणसरोरुहान्तिकम्' इत्यत्र सद्यः श्रुता भगवत्कथा मनःशुद्धिमारभ्य भगवत्पादप्राप्तिपर्यन्तं क्रमेण साधिका भवतीति भावः । नत्विदानीं कथाश्रवणमात्रेण भगवत्प्राप्तिर्भवति ।।

**भगवत्प्राप्तिसाधनमार्गादिवर्णनात् भगवन्निष्ठत्वं ज्ञेयम् अस्मिन् अध्याये ।।**

**इति श्रीमद्भागवते द्वितीयस्कन्धे द्वितीयोऽध्यायः**

# अथ तृतीयोऽध्यायः

**अकामः सर्वकामो वा मोक्षकाम उदारधीः ।**
**तीव्रेण भक्तियोगेन यजेत पुरुषं परम्।। १० ।।**

'सर्वकाम' इत्यनेन इतरेषां भजनमेकैकफलदानायेष्टे । तेषामेकैकाधिपतित्वात् । विष्णुभजनं सर्वकामदानायालं विष्णोः सर्वाधिपतित्वादित्याह ।।

**एवं भगवद्भजनस्य मोक्षादिफलदत्वकथनेन शौनकप्रश्नव्याजेन सर्वेन्द्रियाणां भगवद्विषयकतासम्पादनस्य आवश्यकतावर्णनेन षडङ्गसेवारूपब्रह्मचर्यवर्णने तात्पर्यवत्वात् भगवन्निष्ठता ज्ञेया ।।**

**इति श्रीमद्भागवते द्वितीयस्कन्धे तृतीयोऽध्यायः**

# अथ चतुर्थोऽध्यायः

**आत्मजायासुतागारपशुद्रविणबन्धुषु ।**
**राज्ये चाविकले नित्यनिरूढां ममतां जहौ ।। २ ।।**

'नित्यनिरूढाम्' इत्यत्र अन्येषामिति शेषः । आत्मादिषु ममता अन्येषां नित्यनिरूढा । अस्य तु ज्ञानित्वेन पूर्वमेव त्यक्तामपि विशेषतो जहाविति भावः ।। अत एवोत्तरत्र स्वात्मभावं दृढं गत इत्युक्तम् ।।

**राजोवाच—**

**समीचीनं वचो ब्रह्मन्सर्वज्ञस्य तवानघ ।**
**तमो विशीर्यते मह्यं हरेः कथयतः कथाः ।। ५ ।।**

श्रीशुकपरीक्षित्संवादव्याजेन श्रवणकीर्तनाख्यौ भगवद्धर्मौ प्रदर्शितौ । एवं सर्वत्र प्रश्नोत्तरे अनुसन्धेयम् ।।

**सूत उवाच—**

**इत्युपामन्त्रितो राज्ञा गुणानुकथने विभोः ।**
**हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ।। ११ ।।**

'हृषीकेशम्' इत्यनेन भगवतः सर्वेन्द्रियप्रेरकत्वात् स एव मयि स्थित्वोपदिशति परीक्षिति स्थित्वा शृणोतीति अनुसन्दधान इति सूचयति ।।

**श्रीशुक उवाच—**

**नमः परस्मै पुरुषाय भूयसे**
**सदुद्भवस्थाननिरोधलीलया ।**
**गृहीतशक्तित्रितयाय देहिना-**
**मन्तर्ध्रुवायाऽनुपलभ्यवर्त्मने ।। १२ ।।**

'नमः परस्मै' इत्यादिषु बहुवारं नमउक्तेः सद्भावात् इदं ज्ञायते । भगवान् बहुवारं नम्य इति । 'एकोऽपि कृष्णस्य कृतप्रणामः' इति स्मृत्या भ्रान्ताः एकवारं भगवतो नमनं कार्यम् , द्वितीयादेर्व्यर्थत्वात् इति सङ्गिरन्ते । एवं चेत् प्रेक्षावत्त्वेनाभिमतः श्रीशुकः किमर्थं बहुवारं नमउक्तिं कृतवान् इति प्रश्ने निरुत्तरत्वं स्यात् । अत्राभियुक्तानामिदं मतम् । एकवारनमस्कारेण पूर्वपुण्यहानिरिति । विष्णवे कनिष्ठपक्षे पञ्च नमस्काराः, वायवे चत्वारः, शिवाय त्रयः, सूर्याय द्वौ, गणपतय एकमिति तत्वम् ।। एवंस्थितेपि विष्णवे द्वित्रिनमस्कारान् कुर्वन्तीत्यहो । अनेके नमस्काराः कर्तव्या इति अङ्गुलिद्वयेन सूचयन्ति भगवत्पादा इति गुरुपादाः । अङ्गुलिद्वयमेकत्वनिषेधमुखेनेनानेकोपलक्षकं, नतु द्वित्वविधायकमित्यलम् ।।

'अन्तर्ध्रुवाय अनुपलभ्यवर्त्मने' इत्येतन्महिमैवाचार्यैः 'दूराद्दूरतरं यत्तु तदेवान्तिकमन्तिकात्' इत्युक्तः । 'यद्दूरे यद्वदन्तिके' इति च श्रुतिः ।।

**किरातहूणान्ध्रपुलिन्दपुल्कसा**
**आभीरकङ्का यवनाश्शकादयः ।**
**येऽन्ये च पापा यदपाश्रयाश्रया-**
**च्छुध्यन्ति तस्मै प्रभविष्णवे नमः ॥ १८ ॥**

किरातादयश्चण्डालादपि नीचाः । 'पापा' इत्यत्र पापं कृत्वा एतासु योनिषु जाता इत्यर्थः । स्वभावतः पापानां भगवद्भक्ताश्रयणायोगात् ॥

**भूतैर्महद्भिर्य इमाः पुरो विभु-**
**र्निर्माय शेते यदमूषु पुरुषः ।**
**भुङ्क्ते गुणान्षोडशषोडशात्मकः**
**सोऽलङ्कृषीष्ट भगवान् वचांसि मे ॥ २३ ॥**

'भुङ्क्ते गुणान्' इत्यत्र पुरुषेषु स्थित्वा तदिन्द्रियेषु व्यापारं कुर्वन् तद्भुक्त-शब्दादिषु सारं भुङ्क्ते इति भावः । 'शुभं पिबत्यसौ विष्णुः नाशुभं स हरिः पिबेत् । पूर्णानन्दमयस्यास्य चेष्टा न ज्ञायते क्वचित्'इति श्रीमद्भाष्योक्तेः ॥

**श्रीशुककृतमङ्गलाचरणव्याजेन भगवन्महिमातिशयः अभ्यधायि अस्मिन्नध्याये ॥**

**इति श्रीमद्भागवते द्वितीयस्कन्धे चतुर्थोऽध्यायः**

## अथ पञ्चमोऽध्यायः

**नारद उवाच—**

**देवदेव नमस्तेऽस्तु भूतभावन पूर्वज ।**
**तद्विजानीहि यज्ज्ञानमात्मतत्वनिदर्शनम् ॥ १ ॥**

'पूर्वज' इत्यनेन ब्रह्मा पूर्वज एव अतस्तज्जनकोऽन्यः अस्तीति नारदो

वेदेति ज्ञायते । स्वज्ञानातिशयार्थं लोकोपकारार्थं च प्रश्नः । ब्रह्माऽपि 'सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितम्' इति वदति ।।

**विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।**
**विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ।। १३ ।।**

'विलज्जमानया यस्य' इत्यत्र स्त्रीस्वभावं प्रदर्शयन्त्या रमया अनादितः पत्नीभावमापन्नया अपि लज्जावत्येव स्थातुं न शक्यते ।'गात्रान्तराण्यपि दधुः' इत्युक्तेः । बन्धकमाया विलज्जमानेव दूरतोऽपयाति । मुख्या माया भगवदिच्छा । अमुख्या चिदचिद्भेदेन द्विविधा प्रकृतिः । स्वरूपाच्छादिकारूपा दुष्टा माया अमुख्यतमा । अन्त्या दीना दुःखितेत्यर्थः । 'द्वे दुष्टे प्रकृती' इत्यादि श्रुतिगीतातात्पर्योक्तेः ।।

**नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः ।**
**परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ।। २६ ।।**

'परान्वयान् शब्दवांश्च' इत्यादिना शब्द आकाशमात्रवृत्तिरिति वदन्तः अपहस्तिताः ।।

**भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकस्तु नाभितः ।**
**स्वर्लोकः कल्पितो मूर्ध्नि इति वा लोककल्पना।। ४२ ।।**

'भूर्लोकः कल्पितः पद्भ्याम्' इत्यत्र चतुर्दशलोकविन्यासचिन्तने अक्षमान् प्रति त्रिलोकविन्यासचिन्तनमुपदिष्टम् ।

**भगवत्सृष्टिकर्मविवरणेन स्पष्टा भगवन्निष्ठता ।। पुरुषसूक्तोक्तमहा-महिमावर्णनेन स्पष्टं भगवत्प्रतिपादकत्वम् ।।**

**इति श्रीमद्भागवते द्वितीयस्कन्धे पञ्चमोऽध्यायः**

## अथ षष्ठोऽध्यायः

**नाहं न यूयं बत तद्गतिं विदुः**
**न वामदेवः किमुतापरे सुराः ।**
**यन्मायया मोहितबुद्धयस्त्विदं**
**विनिर्मितं स्वात्मसमं विचक्ष्महे।। ३६ ।।**

वामदेवो रुद्रः ।।

**आद्योऽवतारः पुरुषः परस्य**
**कालः स्वभावः सदसन्मनश्च ।**
**द्रव्यं विकारो गुण इन्द्रियाणि**
**विराड् स्वराट्स्थास्नु चरिष्णु भूम्नः।। ४१ ।।**

'आद्योवतारः पुरुष' इत्यत्र 'प्रथमं महतः स्रष्टु' इत्युक्तप्रकारेण महत्तत्वस्रष्टा पुरुष इत्यर्थः ।। भगवन्महिमावर्णनं स्फुटम् ।।

**इति श्रीमद्भागवते द्वितीयस्कन्धे षष्ठोऽध्यायः**

## अथ सप्तमोऽध्यायः

**विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः**
**पार्थिवान्यपि कविर्विममे रजांसि ।**
**चस्कम्भ यः स्वरभसा स्खलितं त्रिपृष्ठं**
**यन्मां निशाम्य सदनादुरुकम्पमानम् ।। ४० ।।**

'विष्णोर्नु वीर्यगणनाम्' इत्यत्र 'विष्णोर्नु कं वीर्याणि प्रवोचम्' इति श्रुत्यर्थमाह ।।

**भगवदवतारवर्णनेन भगवत्प्रतिपादकत्वमत्र स्फुटम् ।।**

**।। इति श्रीमद्भागवते द्वितीयस्कन्धे सप्तमोऽध्यायः ।।**

## अथ अष्टमोऽध्यायः

**प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम् ।**
**धुनोति शमलं कृष्णः सलिलस्थं यथा शरत् ।। ५ ।।**

'धुनोति शमलं कृष्णः' इत्यत्रायं भावः । प्रियगृहं गतो नूतनवस्त्रधारी सखा तद्दत्तासनस्थितं धूलिं स्वयं विधूयोपविशति तथा भक्त्या स्वकथां श्रुण्वतां हृदयं प्रविश्य स्वयं दोषदूरः अघलिप्ते हृदि उपवेष्टुमनिच्छुः तदघं विधूयोपविशतीति गुरुपादाः ।।

**एतदध्याये पुना राजप्रश्नव्याजेन भगवदपरोक्षसाधनश्रवणं विहितमिति भगवन्निष्ठता ।।**

**इति श्रीमद्भागवते द्वितीयस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**सञ्चिन्तयन् द्व्यक्षरमेकदाम्भ-**
**स्युपाशृणोद् द्विर्गदितं वचो विभुः ।**
**स्पर्शेषु यच्छोडशमेकविंशं**
**निष्किञ्चनानां नृप यद्धनं विदुः ।। ६ ।।**

'निष्किञ्चनानां नृप यद्धनं विदुः' इत्यत्र निष्किञ्चनभक्तैरार्जितं तप एव धनम् । यथा आपद्धनमार्जितमापत्काले सहायकं भवति एवं निष्किञ्चनानां तपोधनं निमित्तीकृत्य भगवानापत्काले रक्षतीति भावः ।।

**न वर्तते यत्र रजस्तमस्तयोः**
**सत्वश्च मिश्रं न च कालविक्रमः ।**
**न यत्र माया किमुतापरे हरे-**
**रनुव्रता यत्र सुरासुरार्चिताः ।। १० ।।**

'तयोः सत्वं च मिश्रम्' इत्यत्र रजस्तमोमिश्रं सत्वं नास्ति । शुद्धसत्वं तु वर्तते । मुक्तभोग्याः फलपुष्पादयः शुद्धसत्वात्मकाः । अत्र विष्णुरहस्यं प्रमाणम् ।।

**श्यामावदाताः शतपत्रलोचनाः**
**पिशङ्गवस्त्राः सुरुचः सुपेशसः ।**
**सर्वे चतुर्बाहव उन्मिषन्मणि-**
**प्रवेकनिष्काभरणाः सुवर्चसः ।। ११ ।।**

'श्यामावदाताः' इत्यादिना मुक्तानां शरीरहीनत्वं वर्णयन्तो वैशेषिकादयो निरस्ताः ।।

**अहमेवासमग्रे च नान्यद्यत् सदसत्परम् ।**
**पश्चादहं त्वमेतच्च योऽवशिष्येत सोऽस्म्यहम्।। ३२ ।।**

'अहमेवासमग्रे' इत्यत्र कालत्रयेऽपि स्वातन्त्र्यं जगत्सृष्ट्यादिकर्तृत्वं चोक्तम् । अयमेव नारायणशब्दार्थः ।।

**ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।**
**तद्विद्यादात्मनो मायां यथाभासो यथातमः ।। ३३ ।।**

'ऋते अर्थम्' इत्यत्र भगवतः जगतः सकाशात् प्रयोजनराहित्यस्य कथनेन ब्रह्मत्वापरपर्यापूर्णत्वं कथितम् । 'यथाभासो यथातमः' इत्यत्र जगत्सत्यत्वमभिहितम् ।।

**यथा महान्ति भूतानि भूतेषूच्चावचेषु च ।**
**प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्  ।। ३४ ।।**

'यथा महान्ति' इत्यत्र व्याप्तत्वं कथितम् । अयमेव विष्णुशब्दार्थः ।।

**एवं विष्णोरेव श्रीमद्भागवतप्रतिपाद्यत्वमुक्तमस्मिन्नध्यायान्तर्गत-चतुःश्लोक्याम् ।।**

**विष्णुधामभूतवैकुण्ठवर्णनात् ब्रह्मणे वरदानाख्यस्य महिम्नो वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते द्वितीयस्कन्धे नवमोऽध्यायः**

## अथ दशमोऽध्यायः

**दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।**
**वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा  ।। २ ।।**

'दशमस्य विशुद्ध्यर्थम्' इत्यत्र भागवतीयं सर्ववर्णनं भगवदर्थमिति महाभागवतः श्रीशुक एव आचष्टेति नास्माभिरत्र किञ्चिदुत्प्रेक्षितमिति ज्ञातव्यम् ।

**आध्यात्मिकादिरूपत्रयवर्णनेन ब्रह्मान्तर्यामिणो भगवतः सृष्टि-व्यापारस्य कथनेन भगवन्निष्ठता वेद्या ।।**

**इति श्रीमद्भागवते द्वितीयस्कन्धे दशमोऽध्यायः**

**।। इति श्रीद्वितीयस्कन्धगतप्रमेयसङ्ग्रहः ।।**

।। श्रीलक्ष्मीनारायणार्पणमस्तु ।।

# अथ तृतीयः स्कन्धः

## अथ प्रथमोऽध्यायः

**प्रथमाध्याये विदुरयात्राकथनव्याजेन भगवदपरोक्षसाधनाष्टाङ्गयोग-मध्यपतितनियमान्तर्भूततीर्थयात्राधर्मकथनात् भगवदनुबन्धि-कुशलप्रश्नव्याजेन भागवतस्मरणाख्यधर्मकथनात् 'नूनं नृपाणाम्' इत्यादिश्लोकेषु स्पष्टमेव कृष्णमहिमाकथनाच्च भगवन्निष्ठता ज्ञेया ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे प्रथमोऽध्यायः**

**ततः परमध्यायत्रये कृष्णावतारकथा सङ्क्षेपेण निरूपिता ।।**

## अथ द्वितीयोऽध्यायः

**पुलकोद्भिन्नसर्वाङ्गो मुञ्चन् मीलद्दृशाश्रु सः ।**
**पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ।। ५ ।।**

'पूर्णार्थो लक्षितस्तेन'इत्यत्र विदुरेण उद्धवः अपरोक्षज्ञानी इति लक्षणतो ज्ञात इत्यर्थः । अपरोक्षज्ञानित्वाभावेऽसम्प्रज्ञातसमाध्यवस्थाभावात् ।।

**मन्येऽसुरान् भागवतांस्त्र्यधीशे**
**संरम्भमार्गाभिनिविष्ठचित्तान् ।**
**ये संयुगेऽचक्षत तार्क्ष्यपुत्र-**
**स्यांसे सुनाभायुधमापतन्तम् ।। २४ ।।**

'ताक्ष्यपुत्रस्यांसे सुनाभायुधम्' इत्यत्र गरुडवाहं चक्रपाणिं ये दृष्टवन्तो मरणकाले ते भागवता इत्युक्तं भवति । साल्वपौण्ड्रादिषु जीवद्वयावेशात् एतद्युज्यते।।

**अयाजयद् गोसवेन गोपराजं द्विजोत्तमैः ।**
**वित्तस्य चोरुभारस्य चिकीर्षन् सद्व्ययं विभुः।। ३२ ।।**

'गोसवेन' इत्यत्र 'वाजपेयं सगोसवम्' इत्युक्तदिशा क्रत्वष्टकमध्ये गोसवो नाम क्रतुविशेष इति ज्ञातव्यम् ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे द्वितीयोऽध्यायः**

## अथ तृतीयोऽध्यायः

**समाहुता भीष्मककन्यया ये**
**श्रियः सवर्णेन जिहीर्षयैषाम् ।**
**गान्धर्ववृत्त्या मिषतां स्वभागं**
**जह्रे पदं मूर्ध्नि दधत् सुपर्णः ।। ३ ।।**

'सवर्णेन' इत्यत्र केवलं क्षत्रियत्वनिमित्तेन समाहुताः । न तु वरणार्थमित्युक्तं भवति ।।

**प्रियं प्रभुर्ग्राम्य इव प्रियाया**
**विधित्सुरार्च्छद् द्युतरुं यदर्थे ।**
**वज्र्याद्रवत् तं सगणो रुषान्धः**
**स्वार्थे पुरा तैर्यमयाचतानतः ।। ५ ।।**

'ग्राम्य इव' इत्यत्र यथा ग्राम्यः पुरुषः प्रियायाः प्रियं विदधाति तथा द्युतरुमार्च्छत् इति नार्थः । किन्तु अग्राम्योपि ग्राम्य इव अदर्शयदिति भावः ।।

'पुरा यमयाचत' इत्यनेन अवतारकाले स्वयम् इन्द्रः कृष्णं स्वार्थे प्रार्थितवान् । इदानीं रुषान्धः कोपेन ज्ञानशून्यः सन् योधयामासेत्युक्तं भवति ।।

**तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः ।**
**एकैकस्यां दश दश प्रकृतेर्विबुभूषया ।। ९ ।।**

'आत्मतुल्यानि' इत्यत्र किञ्चित् सादृश्यविशिष्टानीत्यर्थः । 'उत्तमैः सर्वतः साम्यं किञ्चित् साम्यमुदीरितम्' इति भगवत्पादोक्तेः ।।

**सकर्णदुःशासनसौबलानां**
**कुमन्त्रपाकेन हतश्रियाऽयुषम् ।**
**सुयोधनं सानुचरं शयानं**
**भग्नोरुमुर्व्यां स ननन्द पश्यन् ।। १३ ।।**

'ननन्द' इत्यत्र आनन्दं व्यञ्जयामासेत्यर्थः । व्यञ्जनमपि न स्वापेक्षया । अतिरोहितगुणत्वात् । किन्तु परापेक्षया ।।

**कियान् भुवोऽयं क्षपितोरुभारो**
**यद् द्रोणभीष्मार्जुनभीमशल्यैः ।**
**अष्टादशाक्षौहिणिको मदंशै-**
**रास्ते बलं दुर्विषहं यदूनाम् ।। १४ ।।**

'यदूनां बलमास्ते' इत्यत्र यादवानां कृष्णभक्तवत्वात् कथं भूभार-हेतुत्वमिति चेत् तानसंहृत्य कृष्णेन भूत्यागे आगमिष्यत्कलिप्रभावेन यदा पापमाचरेयुः तदा भूभारः अभविष्यदिति भावः ।।

**मिथो यदैषां भविता विवादो**
**माध्व्या मदात् ताम्रविलोचनानाम् ।**
**नैषां वधोपाय इयानतोऽन्यो**
**मय्युद्यतेन्तर्दधते स्वयं स्म ।। १५ ।।**

'मिथो यदैषाम्' इत्यत्र अतिबलिष्ठानां तेषां प्रद्युम्नादीनां परस्परं विना नान्यो वधोपाय इत्यर्थः ।।

**उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना ।**
**स वै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः ।। १७ ।।**

'पुनर्भगवता धृतः' इत्यनेन गर्भे रक्षितः पुनः प्रसूतिकाले मृत उज्जीवित इति कथां सूचयति । 'वै' इत्यनेन तत्प्रसिद्धिमाह ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे तृतीयोऽध्यायः**

## अथ चतुर्थोऽध्यायः

**उद्धव उवाच–**

**तेषां मैरेयदोषेण विषमीकृतचेतसाम् ।**
**निम्लोचति रवावासीद् वेणूनामिव मर्दनम् ।। २ ।।**

'निम्लोचति रवौ' इत्यनेन अर्धदिनमात्रेण यदुकुलसंहारो जात इति सूचयति । अन्यथैतदुक्तेर्व्यर्थत्वात् ।।

**वाम ऊरावधिश्रित्य दक्षिणाङ्घ्रिसरोरुहम् ।**
**अपाश्रितार्भकावस्थमकृशं त्यक्तपिप्पलम् ।। ८ ।।**

'अपाश्रितार्भकावस्थम्' इत्यत्र श्रीकृष्णस्य वयोविकारा न सन्तीति सूचितम् ।।

**को न्वीश ते पादसरोजभाजां**
**सुदुर्लभोऽर्थेषु चतुर्ष्वपीह ।**
**तथापि नाहं प्रवृणोमि भूमन्**
**भवत्पदाम्भोजनिषेवणोत्सुकः ।। १५ ।।**

'को न्वीश' इति प्राक् रामं प्रति हनूमदुक्तमेव कृष्णं प्रति उद्धवेनोक्तमिति ज्ञेयम् ।।

**सोऽहं त्वद्दर्शनाह्लादवियोगार्तियुतः प्रभो ।**
**गमिष्ये दयितं तस्य बदर्याश्रममण्डलम् ।। २१ ।।**

'गमिष्ये दयितम्' इत्यत्रेदं ज्ञातव्यम् । मैत्रेयोद्धवौ प्रति श्रीकृष्णोपदेशादनन्तरं उद्धवो भगवदाज्ञया बदरीं गतवान् । मध्ये विदुरसमागमो जातः । बदर्यां ज्ञानोपदेशं कृत्वा उद्धवः द्वारकां प्रत्यागतवान् । पुनः श्रीकृष्णभूत्यागात् सप्तदिनादर्वाक् उद्धवगीतारूपमुपदेशं कृष्णात् प्राप्य पुनर्बदरीं गतवान् इति । स मैत्रेयोपदेशः भूत्यागात् षड्विंशद्वत्सरात् पूर्वमेव जातः ।।

**आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितम् ।**
**ध्यायन् गते भागवते रुरोद प्रेमविह्वलः ।। ३५ ।।**

'मनसेक्षितम्' इत्यत्र विजयध्वजीयं व्याख्यानं स्मृतमिति । सर्वं सदा प्रत्यक्षीकुर्वतः कृष्णस्य स्मरणायोगात् स्मृतमित्यस्य अनुग्रहबुद्धेर्विषयीकृतमित्यर्थो द्रष्टव्यः ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे चतुर्थोऽध्यायः**

## अथ पञ्चमोऽध्यायः

**तदस्य कौषारव शर्मदातु-**
**र्हरेः कथामेव कथासु सारम् ।**
**उद्धृत्य पुष्पेभ्य इवार्तबन्धो**
**शिवाय नः कीर्तय तीर्थकीर्तेः ।। १५ ।।**

'पुष्पेभ्य' इत्यत्र पुष्णन्तीति पुष्पाणि पुराणानि । तेभ्य इति श्लेषलब्धोऽर्थः ।।

अत्राध्याये भगवत्कथामहिमवर्णनात् भगवन्निष्ठत्वं बोध्यम् ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे पञ्चमोऽध्यायः**

## अथ षष्ठोऽध्यायः

**ततोऽभवन्महत्तत्त्वमव्यक्तात् कालचोदितात् ।**
**विज्ञानात्मात्मदेहस्थं विश्वं व्यञ्जंस्तमो नुदन् ।। ५ ।।**

'ततोऽभवन्महत्तत्वमित्यादिषु' 'भूतं भूताभिमानी च' इत्युक्तन्यायेन तत्वस्य तत्वाभिमानिनिनः तद्देहस्य तद्गतहरेश्चेति चतुर्विधा सृष्टिरनुसन्धेया।।

**कालमायांशयोगेन भगवद्वीक्षितं नभः ।**
**तामसानुसृतं स्पर्शं विकुर्वन् निर्ममेऽनिलम् ।। ११ ।।**

'कालमायांशयोगेन' इत्यत्र कालस्य मायापरपर्यायप्रकृतेः अंशाख्य-जीवस्य च सम्बन्धेनेत्यर्थः ।। तथाच भगवान् एकतत्वसृष्ट्यनन्तरम् अपर-तत्वसृष्टेः यावान् फलपाचकः कालोऽपेक्षितः तावत्कालान्तरं पूर्वतत्वस्य प्रकृत्यंशं संयोज्य अपरां तत्वदेवतां च तत्र संयोज्य अपरततत्वं सृजतीति भावः । यदस्पष्टं तद्गुरुमुखेनैव विशदतया ज्ञातव्यम् । एतत् सर्वत्र समम् ।।

**भूतानां नभआदीनां यद्यद् भाव्यं परात् परम् ।**
**तेषां परानुसंसर्गाद् यथासङ्ख्यं गुणान् विदुः ।। १५ ।।**

'तेषां परानुसंसर्गात्' इत्यत्र आकाशादिपृथिव्यन्तेषु भूतेषु क्रमेण एकद्विचतुःपञ्चगुणा सन्तीति उच्यते । तेन शब्दमाकाशविशेषगुणं मन्वाना वैशेषिका निरस्ता वेदितव्याः ।।

**पानेन ते देव कथासुधायाः**
**प्रवृद्धभक्त्या विशदाशया ये ।**

**वैराग्यसारं प्रतिलभ्य बोधं**
**यथाऽञ्जसा त्वेयुरकुण्ठधिष्ण्यम् ।। २४ ।।**

**तथापरे चात्मसमाधियोग-**
**बलेन जित्वा प्रकृतिं बलिष्ठाम् ।**
**त्वामेव धीराः पुरुषं विशन्ति**
**तेषां श्रमः स्यान्न तु सेवया ते ।। २५ ।।**

'पानेन ते' 'तथाऽपरे' इति श्लोकद्वये इदं द्रष्टव्यम् । मोक्षार्थं द्वौ मार्गौ कथामार्गो योगमार्गश्चेति । प्राचुर्याभिप्रायेण मार्गद्वयोक्तिः ।। कथामार्गे आयासो नास्ति । योगमार्गे श्वासजयाद्यायासो वर्तते । किन्तु योगमार्गेण शीघ्रमेव मुक्तिः । परन्तु कथामार्गेण श्रेष्ठतरा मुक्तिः इति ।। अत्राप्यधिकः प्रमेयः गुरुमुखेन ज्ञातव्यः ।।

प्राकृतसृष्टिरत्र वर्णिता । निरन्तरानन्तराध्याये वैराजसृष्टिः वर्ण्यते । तदनन्तरं पाद्मकल्पसृष्टिः । एकादशाध्याये प्राकृतसृष्टिसङ्क्षेपं कृत्वा वैकृत-सृष्टिरिति क्रमः ।।

**भगवत्सृष्टिवर्णनात् देवतास्तोत्रमुखेन भगवन्महिमावर्णनाच्च भगव-न्निष्ठत्वमस्याध्यायस्य ।**

**इति श्रीमद्भागवते तृतीयस्कन्धे षष्ठोऽध्यायः**

## अथ सप्तमोऽध्यायः

**एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः ।**
**आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ।। ८ ।।**

'आद्योऽवतार' इत्यत्र 'द्वितीयमण्डसंस्थितम्' इत्युक्तप्रकारेण ब्रह्माण्डा-न्तर्गततद्व्याप्तपुरुषावतार उच्यते ।।

‘प्रथमं महतः स्रष्टु’ इत्युक्तपरमपुरुषापेक्षया अस्य द्वितीयत्वेऽपि ब्रह्माण्डान्तः अस्य प्रथमत्वात् ‘आद्यः’ इत्युक्तम् ।।

**स्मरन् विश्वसृजामीशो विज्ञापितमधोक्षजः ।**
**विराजमतपत् स्वेन तेजसैषां विवृद्धये ।। १० ।।**

**अथ तस्याभितप्तस्य कतिचायतनानि ह ।**
**निरभिद्यन्त देवानां तानि मे गदतः शृणु ।। ११ ।।**

‘अतपत्, अभितप्त’ इत्यत्र अभितपनं नाम अवकाशकरणम् ।।

**पादावस्य विनिर्भिण्णौ लोकेशो विष्णुराविशत् ।**
**गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते ।। २२ ।।**

‘विष्णु’रित्यत्र विष्ण्वाविष्टो जयन्त इत्यर्थः । केवलविष्णोरिन्द्रियाभिमानिमध्ये गणनायोगात् ।।

**मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह ।**
**यत्रोन्मुखत्वाद् वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः।। ३० ।।**

‘ब्राह्मणः’ इत्यादिभिः तत्तज्जात्यभिमानिदेवता ग्राह्या ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे सप्तमोऽध्यायः**

## अथ अष्टमोऽध्यायः

**अत्र भगवन्मायाबन्धकत्वस्य तदनुग्रहस्य मोचकत्वस्य च वर्णनात् भगवन्निष्ठत्वं बोध्यम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**चतुर्युगानां च सहस्रमप्सु**
**स्वपंस्तयोदीरितया स्वशक्त्या ।**
**कालाख्ययाऽसादितकर्मतन्त्रो**
**लोकानपीमान् ददृशे स्वदेहे ॥ १२ ॥**

'चतुर्युगानां सहस्रम्' इत्यत्र प्रथमपरार्धान्तिमरात्र्याः चतुर्युगसहस्र-परिमितत्वात् तद्रात्रिमप्सु सुष्वापेति ज्ञातव्यम् ॥

**तमस्यपारे विदुरात्मसर्गं**
**विचिन्वतोऽभूत् सुमहांस्त्रिनेमिः ।**
**यो देहभाजां भयमीरयाणः**
**परिक्षिणोत्यायुरजस्य हेतिः ॥ २० ॥**

'अभूत् ,महान् त्रिनेमिः' इत्यस्य सहस्रवत्सरात्मककालोऽभूदित्यर्थः ॥

अत्र पाद्मकल्पवर्णनम् ॥

**इति श्रीमद्भागवते तृतीयस्कन्धे नवमोऽध्यायः**

## अथ दशमोऽध्यायः

**यन्नाभिपद्मभवनादहमासमद्य**
**लोकत्रयोपकरणो यदनुग्रहेण ।**
**तस्मै नमस्त उदरस्थभवाय योग-**
**निद्रावसानविकसन्नलिनेक्षणाय ॥ २१ ॥**

योगनिद्रा नाम योगिनो यथा निद्राभावेऽपि लोचने निमीलयन्ति तथा लोचननिमीलनमात्रम् । नहि भगवतो योगागाभ्यासनामा इति ॥

**चतुर्मुखस्तोत्रेण भगवतो महिमाविशेष एव वर्णितः ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे दशमोऽध्यायः**

## अथ एकादशोऽध्यायः

**यथेदानीं तथा चाग्रे पश्चादप्येतदीदृशम् ।**
**सर्गो नवविधस्तस्य प्राकृतो वैकृतश्च यः ।। १३ ।।**

'नवविध' इत्यत्र षड्विधः प्राकृतः त्रिविधः वैकृत इति विवेकः ।।

**षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः ।**
**षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु ।। १७ ।।**

'षष्ठस्तु तमसः सर्ग इत्यनेन भूतानां तामसांशेन तमोमयाविद्या-सृष्टिकथनान् पञ्चपर्वाविद्यायां तमसोऽपि गणनात् तमः आलोकाभाव एवेति वदन्तस्तार्किकाः, तमः पार्थिवमिति मन्यमाना रामानुजीयाश्च निरस्ता वेदितव्याः ।।

प्राकृतवैकतसृष्टिमहिमावर्णनमत्रेति बोध्यम् ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे एकादशोऽध्यायः**

## अथ द्वादशोऽध्यायः ।

**अस्मिन्नध्याये भगवतः कालानन्त्यस्य देशानन्त्यस्य च वर्णनेन भगवन्महिमैव वर्णितो द्रष्टव्यः ।।**

बुद्धौ सुखावरोहाय कालावयवानां कोष्ठको दीयते ।।

द्व्यणुकः = 2 परमाणू.

त्र्यणुकः/त्रसरेणुः = 3 द्व्यणुकाः।

त्रुटिः= 3 त्र्यणुकाः ।

वेधः= 3 त्रुटयः ।

लवः = 3 वेधाः।

निमेषः=3 लवाः ।

क्षणः=3 निमेषाः ।

नाडिका =15 लघूनि ।

मुहूर्तम्= 6 नाडिकाः ।

प्रहरः =6 नाडिकाः ।

यामः = 7 नाडिकाः* ।

याममानं सूर्यगतिभेदेन भिद्यत इति ज्ञेयम् । मुहूर्तमानमपि क्वचित् भिन्नं निर्दिष्टम् । एकदिनस्य 30 वा 32 वा मुहूर्तानि इति ।। पञ्चमस्कन्धे एतदेव किञ्चिद्विव्रियते ।।

अतः 'अद्राक्षीदुत्पततन्तं तत उत गिरिमुत्पाटयन्तं गृहीत्वा यान्तं खे राघवाङ्घ्रौ प्रणतमपि तदैकक्षणे त्वां हि लोकः' इत्युक्तिः कथं घटते । क्षणस्य पूर्वापरकालविकलत्वात् इति चोद्यानवकाशः ।।

क्षणस्य निमेषत्रयात्मकत्वेन एकस्मिन् निमेषे उत्पतन्तं, द्वितीयनिमेषे गिरिमुत्पाटयन्तं, तृतीयनिमेषे यान्तं प्रणतमपीति विभागोपपत्तेः ।।

* नाडिका = 24 निमेषाः (आङ्ग्लगणने)

1440 सेकण्डवः (Seconds)

= 15 ×15× 5 =1125 क्षणाः

= 1क्षणः $= \frac{1440}{1125}$ = 1.28(Sec)

अहः/रात्रिः = 4 यामाः ।

पक्षाः = 15 अहोरात्राणि।

मासः = 2 पक्षौ । कृष्णपक्षः पितृणामहः, शुक्लपक्षः पितृणां रात्रिः ।

ऋतुः 2 मासौ । मासः पितृणां दिनम् ।

अयनम् = 6 मासाः । उत्तरायणं देवनानामहः । दक्षिणायनं देवानां रात्रिः ।

वत्सरः = 2 अयने । वत्सरः देवानां दिनम् ।।

## अथ वत्सरपञ्चकविवेकः

संवत्सरः = रवेः द्वादशराशिषु सञ्चारकालः ।।

अनुवत्सरः = चन्द्रस्य द्वादशराशिषु सञ्चारकालः चान्द्रमानमासः । तादृशद्वादशमासात्मककालः ।

इडावत्सरः = नक्षत्राणां द्वादशावर्तनकालः द्वादशनक्षत्रमासा इत्यर्थः ।।

परिवत्सरः = बृहस्पतेः द्वादशराशिषु सञ्चारकालस्य द्वादशो भागः ।।

वस्तरः = षष्ट्युत्तरत्रिशतदिनात्मकः कालः ।।

## अथ युगमानानि

कृतम् =4000 देवमानवर्षाणि **सन्ध्याकालः** पूर्वोत्तरं 400 वर्षाणि

त्रेता = 3000 देवमानवर्षाणि 300 वर्षाणि ।

द्वापरम् =2000 देवमानवर्षाणि 200 वर्षाणि ।

कलिः =1000 देवमानवर्षाणि 100 वर्षाणि ।

**मिलित्वा** चतुर्युगस्य 12000 देवमानवर्षाणि

= 43,20,000 मनुष्यमानवर्षाणि ।

अत्र कलिः =4,32,000 वर्षाणि ।

द्वापरः = 8, 64,000 वर्षाणि ।

त्रेता = 12, 96,000 वर्षाणि ।

कृतम् = 17,28,000 वर्षाणि ।

## ब्रह्मदिनम्

1000 चतुर्युगानि । 4,32,00,00,000 वर्षाणि ।

एवञ्च ब्रह्ममानेन 1 Sec = 100,000मानुषवर्षाणि ।

ब्रह्मणः अहोरात्रम् 2000 चतुर्युगानि । 864,00,00,000वर्षाणि ।

ब्रह्मणो वत्सरः 864× 360× 311040 कोटिवर्षाणि ।

ब्रह्मकल्पः 100 ब्रह्मवत्सराः । 3,11,05,000 कोटिवर्षाणि ।

तादृशकालः परब्रह्मणो निमेष इत्युपचर्यते इत्यहो!

**निशावसान आरब्धो लोककल्पोऽनुवर्तते ।**
**यावद् दिनं भगवतो मनून् भुञ्जंश्चतुर्दश ।।**

**स्वं स्वं कालं मनुर्भुङ्क्ते साधिका ह्येकसप्ततिः ।। २३ ।।**

'स्वं स्वं कालवं मनुर्भुङ्क्ते' इत्यस्य विवरणम् तत्रस्थचर्चा च अस्मत्कृत-मन्वन्तरप्रलयविचाराख्यप्रबन्धे द्रष्टव्या ।।

**तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ।**
**कालेनानुगतः शेष आस्ते तूष्णीं दिनात्यये ।। २७ ।।**

'शेष आस्ते' इत्यत्र दिनप्रलये शेषशायी, महाप्रलये तु वटपत्रशायी इति ज्ञेयम् ।

**त्रिलोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना ।**
**यान्त्यूष्मणा महर्लोकाज्जनं ऋभ्वादयोऽर्दिताः ।। २९ ।।**

'त्रिलोक्यां दह्यमानायाम्' इत्यत्र दिनप्रलये सङ्कर्षणाग्निना दाहादि वर्तते । मन्वन्तरप्रलये तु त्रिलोकी केवलं जलावृता भवतीति द्रष्टव्यम् । प्रलयात्

सप्तदिनात् पूर्वं सत्यव्रतेन कृतमालायां तपश्चरणवर्णनादष्टमस्कन्धे शत-वर्षपर्यन्तदाहाद्यसम्भवात् ॥

**पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् ।**
**कल्पो यत्राभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः ॥ ३४ ॥**

**तस्यैव चान्ते कल्पोऽभूद् यं पाद्ममभिचक्षते ।**
**यद्धरेर्नाभिसरस आसील्लोकसरोरुहम् ॥ ३५ ॥**

ब्राह्मकल्पादीनामयं निर्णयः । पूर्वपरार्धस्य आदिमदिनं ब्राह्मकल्पः । पूर्वपरार्धस्य अन्तिमरात्रिः पाद्मकल्पः ॥

द्वितीयदिनस्य आदिमदिनं श्वेतवराहकल्प इति ॥

**विकारैः षोडशैर्युक्तो विशेषादिभिरावृतः ।**
**अण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥ ३९ ॥**

'अण्डकोशो बहिरयम्' इत्यत्र अण्डकोशमध्यमारभ्य सर्वासु दिक्षु पञ्च-विंशत्कोटियोजनपरिमितावकाशस्य सत्वात् गोलाकारस्य अण्डकोशस्य व्यासः पञ्चाशत्कोटियोजनपरिमितः । तत्परितः सर्वत्र पञ्चविंशत्कोटियोजनपरिमितः सुवर्णमयकटाहः विशेषाख्यः पृथिव्यात्मकः । एवं कटाहसहितब्रह्माण्डस्य बहिःप्रमाणं शतकोटियोजनपरिमितम् । ततः अबादिप्रकृत्यन्तावरणानि क्रमात् दशोत्तराणि ॥

तत्र अभिप्रायविशेषः तात्पर्यनिर्णयप्रकाशिकायां श्रीमद्वादिराज-श्रीमच्चरणकृतायां द्रष्टव्यः । विस्तरभियान्नेहास्माभिः सङ्गृह्यते ॥

**इति श्रीमद्भागवते तृतीयस्कन्धे द्वादशोऽध्यायः**

## अथ त्रयोदशोऽध्यायः

**भगवदनुग्रहपूर्णस्य ब्रह्मणः विविधसृष्टिवर्णनेन भगवन्महिमैव वर्णितः ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे त्रयोदशोऽध्यायः**

## अथ चतुर्दशोऽध्यायः

**वराहावतारवर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे चतुर्दशोऽध्यायः**

## अथ पञ्चदशोऽध्यायः

**विदुर उवाच–**

**तेनैव च मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना ।**
**आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम ।। २ ।।**

तैनैवेत्यस्य रूपान्तरेण इति विजयध्वजीयम् । अस्यार्थो मृग्य इत्याधुनिकाः । न तत्र किञ्चिन्मृग्यम् । भगवत्पादैरेव स्फुटं तात्पर्ये रूपद्वयस्योक्तत्वात् । तथा ह्ययं विवेकः

| **आदिवराहेण** | **द्वितीयवराहेण** |
|---|---|
| ब्रह्मपुत्रः | कश्यपपुत्रः |
| आदिहिरण्याक्षः | विजयाविष्टो हिरण्याक्षः |
| लयोदकमग्न भुव उद्धरणे | तेन मज्जिताया भुव उद्धरणे |
| दंष्ट्रया हतः | कर्णमूले ताडनेन हतः |

**कश्यप उवाच–**

**अप्रायत्यादात्मनस्ते दोषान्मौहूर्तिकादुत ।**
**मन्निर्देशातिचारेण देवानां चैव हेलनात् ।। ३७ ।।**

‘अप्रात्ययात्’ इत्यस्य अप्रायत्य-मुहूर्तदोष-आज्ञोल्लङ्घन-देवहेलनाख्यानि चत्वारि उत्तरोत्तरतः बलीयांसि इति द्रष्टव्यम् ।।

**कश्यप उवाच–**

**कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् ।**
**भगवत्युरुमानाच्च भवे मय्यपि चादरात् ।। ४३ ।।**

एवम् अनुताप-प्रत्यवमर्शन-हरिगुर्वादराणि उत्तरोत्तरत्र बलीयांसि ।।

**पुत्रस्यैव च पुत्राणां भवितैकः सतां मतः ।**
**गायन्ति यद् यशः शुद्धं भगवद्यशसा समम् ।। ४४ ।।**

‘पुत्रस्यैव च पौत्राणाम्’ इत्यत्रेदमवधेयम् । कृतपापानुसारेण दुष्पुत्र-जननं कृतपुण्यानुसारेण सत्पौत्रजननं चेति ।। भगवति मानात् भगवद्भक्तपौत्रजननवर्णनेन वराहावतारपीठिकारचनाच्च भगवन्निष्ठत्वं ज्ञेयम् ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे पञ्चदशोऽध्यायः**

## अथ षोडशोऽध्यायः

**लोके तेन हतालोके लोकपाला हतौजसः ।**
**न्यवेदयन् विश्वसृजे ध्वान्तव्यतिकरं दिशाम् ।। २ ।।**

‘लोके तेन हतालोके’ इत्यत्र तमस आलोकहरणस्य वर्णितत्वात् आलोकविरोधिनः तमआख्य द्रव्यस्य सिद्धिः । नहि कश्चिदभावपदार्थः कश्चिद्भावपदार्थं हरति ।।

दितेर्गर्भो दिशस्तिमिरयति इति उत्तरत्र उक्तत्वाच्चेदमवसेयम् । नहि गर्भः सूर्यादीनाच्छाद्य तिमिरयति किल । किन्तु गर्भादुद्भूतं तमः सूर्यादीन् आच्छादयतीति स्वप्रकाशजावावरणाज्ञानस्य भावत्ववत् स्वप्रकाशसूर्याद्यावरक-तमसोऽपि भावत्वमिति ।।

**न ह्यन्तरं भगवतीह समस्तकुक्षा-**
**वात्मानमात्मनि नभो नभसीव धीराः ।**
**पश्यन्ति यत्र युवयोः सुरलिङ्गिनोः किं**
**व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य ।। ३३ ।।**

'व्युत्पादितं ह्युदरभेदी'त्यत्र उदरभेदो नाम भगवद्रूपेषु परस्परभेद-चिन्तनम् । वैकुण्ठस्य अन्तःस्थितस्य परमात्मनः अस्मदन्तःस्थितपरमात्मनः सकाशात् भेदाभावेन अस्मान् प्रेरयित्वा स्वदर्शनार्थं वैकुण्ठसप्तमद्वारपर्यन्त-मानीतवतः परमात्मनः वयं न अन्तः प्रवेष्टव्या इति आकूतम् असम्भावितम् । अतः दर्शनप्रतिबन्धकरणेन अन्ततः उदरभेदचिन्तनमेव कृतं भवति । तदेव शापनिमित्तम् इति भावः ।।

**भगवद्धामभूतवैकुण्ठवर्णनेन कुमारकृतस्तोत्रेण भागवतहेलनस्या-निष्टापादकत्ववर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे षोडशोऽध्यायः**

## अथ सप्तदशोऽध्यायः

**यस्यामृतामलयशः श्रवणावगाहः**
**सद्यः पुनाति जगदाश्वपचं विकुण्ठः ।**
**सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्ति-**
**श्छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ।। ६ ।।**

'स्वबाहुम्' इत्यत्र बाहुजं क्षत्रियमित्यर्थः । 'बाहू राजन्यः कृतः' इत्युक्तेः । न केवलमेवमुक्तं कृतं च परशुरामेण कार्तवीर्यहननं जमदग्निप्रातिकूल्यात् ।।

**यत्सेवया चरणपद्मपवित्ररेणोः**
**सद्यः क्षताखिलमलं प्रतिलब्धशीलम् ।**
**न श्रीर्विरक्तमपि मां विजहाति यस्याः**
**प्रेक्षालवार्थमितरे नियमोऽर्हते मत् ।। ७ ।।**

'यत्सेवया' इत्यादि दुर्जनमोहनार्थं लोके ब्राह्मणपूजासिद्ध्यर्थं च । यदि भगवानेवं न वदेत् तर्हि स्वभावतो बलिष्ठाः क्षत्रियाः ब्राह्मणान् पीडेरन् ।।

**येषां बिभर्म्यहमखण्डविकुण्ठयोग-**
**मायाविभूतिरमलाङ्घ्रिरजः किरीटैः ।**
**विप्रांस्तु को न विषहेत यदर्हणांभः**
**सद्यः पुनाति सहचन्द्रललामलोकान् ।। ९ ।।**

'यदर्हणाम्भः' इत्यत्र यच्छब्दः 'अह'मित्यस्य परामर्शको नतु 'विप्रान्' इत्यस्य ।।

**भगवत्सनकादिसंवादव्याजेन भगवन्महिमैव वर्णितः ज्ञातव्यः ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे सप्तदशोऽध्यायः**

## अथ अष्टादशोऽध्यायः

**प्रजापतिर्नाम तयोरकार्षीद्**
**यः प्राक् स्वदेहाद् यमयोरजायत ।**
**तं वै हिरण्यकशिपुं विदुः प्रजाः**
**यं तं हिरण्याक्षमसूत सा ततः ।। १८ ।।**

'यः प्राक्' इत्यत्रेदमवधेयम् । यः पूर्वो जातः सः अग्रजः, यः अनन्तरं जातः सः अनुजः इति । गर्भाधानक्रमेण अग्रजत्वनिश्चयः ।।

**हिरण्याक्षप्रतापवर्णनव्याजेन एतादृशहिरण्याक्षवधं कृतवतो भगवतो महिमातिशयो वर्णितो भवति ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे अष्टादशोऽध्यायः**

## अथ एकोनविंशोऽध्यायः

द्वितीयवराहावतारवर्णनम् ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे विंशोऽध्यायः**

## अथ एकविंशोऽध्यायः

**द्वैपायनादनवरो महित्वे तस्य देहजः ।**
**सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः ।। ३ ।।**

'द्वैपायनाद्वनवर' इत्यत्र द्वैपायनस्य किञ्चित्सदृश इत्यर्थः । द्वैपायनसमत्वे उत्तरार्धानुपपत्तिः स्फुटा ।। दैवेनेत्यादि पुनः पुनः सृष्टिकथनं महातात्पर्य-भूततारतम्यज्ञापनार्थम् ।।

**हृषीकेशाविष्टस्य ब्रह्मणः सृष्टेर्वर्णनात् हृषीकेशमहिमैव वर्णितो भवति ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे एकविंशोऽध्यायः**

## अथ द्वाविंशोऽध्यायः

**मैत्रेय उवाच–**

**प्रजाः सृजेति भगवान् कर्दमो ब्रह्मणोदितः ।**
**सरस्वत्यां तपस्तेपे सहस्राणां समा दश ।। ६ ।।**

'सरस्वत्यां तपस्तेपे इत्यत्रेदं द्रष्टव्यम् । कर्दमोऽपि ब्रह्मण आदेशात् प्रजाभिवृद्ध्यर्थं स्वानुरूपपत्नीप्राप्तये तपस्तेपे । 'पूर्वेपि कर्दमपराशरपाण्डुमुख्या यत्सेवया गुणगणाढ्यमपत्यमापुः' इति सुमध्वविजये । अनेनेदं ज्ञायते । स्वानुकूलपुत्रकलत्राद्यर्थे भगवान् प्रार्थनीय इति । एवं चेत् काम्यकर्म न करणीयमिति गीताचार्योक्तं कथं घटते इति चेत्- काम्यकर्म सर्वथा त्यक्तुं न शक्यते । अतः मोक्षोपयोगि यत् तत् सर्वं वित्तपुत्रकलत्रादिकं याच्य-मेव । याचना तु भगवन्तं प्रति कर्तव्या । तत्रापि ममेदं देहि मोक्षोपयोगितया इति । अत एव मध्यगेहभट्टैः 'मुख्यावनं न सुलभं पुरुषादपूर्णात्' इत्यादि चिन्तनं कृत्वा भगवत्सेवा कृता । तदनुसारेण न केवलं पुत्रप्राप्तिः, किन्तु वैकुण्ठप्राप्तिरप्यभूत् । 'वैकुण्ठं यातयोः पित्रोः' इत्युक्तेः । शुश्रूषापक्षपाताद्यैः केभ्यश्चित् केवलं ददौ' इत्युक्तरीत्या स्वपक्षपातिनामपि मोक्षदाता भगवानाचार्यः कथं स्वपित्रोः मोक्षं न ददाति ।।

किञ्च 'बेडिदरे कोडुतिप्प नररिगे' इति हरिकथामृतसारोक्तरीत्या याचनाभावे नराणां पुरुषार्थाप्राप्तिरिति याचना कर्तव्या इति सिद्ध्यतीत्यलं विस्तरेण ।।

'पुण्यजद्रुमलताजालैः' इत्यादिना बिन्दुसरोवर्णनं क्रियते । तच्च काव्याश्रय-वर्णनमिव प्रतीयते । नैवं मन्तव्यम् । नहि अस्मादृशा एव भागवते अधिक्रियन्ते । किन्तु देवादयो महान्तोऽपि । तेषां तत्र ग्राह्यः अंशः कश्चन विद्यते यः अस्माभिरुत्प्रेक्षितुमशक्यः ।।

**कर्दमकृतस्तोत्रव्याजेन भगवन्महिमावर्णनं भगवद्भजनेन मनो-रथप्राप्तिवर्णनं भगवत्प्रीतिसाधननृपधर्मश्चास्मिन्नध्याय इति भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे द्वाविंशोऽध्यायः**

## अथ त्रयोर्विंशोऽध्यायः

**अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः ।**
**रक्षत्यस्मान् द्वयं देवः सदा सदसदात्मकः ॥ ४ ॥**

'अतो ह्यन्योन्यम्' इत्यत्र अयं भावः । ब्राह्मणाः क्षत्रियान् स्वतपोबलेन रक्षन्ति । क्षत्रियाः ब्राह्मणान् स्वबाहुबलेन रक्षन्ति । एवं परस्परं रक्षतः ब्राह्मणान् क्षत्रियांश्च भगवान् रक्षतीति ॥

**उद्यतस्य हि कामस्य प्रतिवादो न शस्यते ।**
**अपि निर्भुक्तसङ्गस्य कामरक्तत्तस्य किं पुनः ॥ १२ ॥**

'उद्यतस्ये'त्यादि चतुर्भिः श्लोकैः इदं ज्ञायते ॥ कन्यापिता स्वयमागत्य स्वां कन्यां प्रददाति चेत् निष्कारणं प्रतिवादं न कुर्यात्, किन्तु कन्यां स्वीकुर्यादिति ॥

**तां प्रार्थयन्तीं ललनाललामा-**
**मसेवितश्रीचरणैरदृष्टाम् ।**
**सुतां मनोरुच्चपदः स्वसारं**
**को नानुमन्येत बुधोऽभिजातः ॥ १८ ॥**

'उच्चपदः स्वसारम्' इत्यनेन भ्रातृमतीत्वात् स्वीकारार्हा इति द्योत्यते । मानवे तथोक्तत्वात् ॥

**मैत्रेय उवाच–**

**स उग्रधन्वन्नियदेवाबभाष**
**आसीच्च तूष्णीमरविन्दनाभम् ।**
**धियोपगृह्णन् स्मितशोभितेन**
**मुखेन चेतो लुलुभे देवहूत्याः ॥ २१ ॥**

‘स्मितशोभितेन मुखेन’ इत्यत्र एतादृशो हरिभक्तो मम पतिर्भवतीति बुद्ध्या देवहूत्या मन्दहासेन चेतोलोभनं द्रष्टव्यम् ।।

अनेनेदं द्योत्यते । ‘कन्या वरयते रूपम्’ इति सुभाषितकारेणोक्तत्वेऽपि श्रेयःकारिणी कन्या विष्णुभक्तमेव वरयेदिति ।।

**महाभागवतस्य मनोज्ञचरित्रस्य वर्णनात् कपिलावतारपीठिका-रूपकर्दमगार्हस्थ्यप्राप्तिवर्णनाच्च भगवन्निष्ठत्वं द्रष्टव्यम् ।।**

**इति श्रीमद्भागवते तृतयस्कन्धे त्रयोविंशोऽध्यायः**

## अथ चतुर्विंशोऽध्यायः

**स्नातं कृतशिरःस्नानं सर्वाभरणभूषितम् ।**
**निष्कग्रीवं वलयिनं कूजत्काञ्चननूपुरम् ।। ३१ ।।**

‘स्नातं कृतशिरःस्नानम्’ इत्यत्र सुमङ्गलीनां शिरस्नानं तैलतः उत्सवकाले कुज-शुक्रवासरयोर्वा केवलं पैतृके कर्मणि इति द्रष्टव्यम् । अन्यदा कण्ठ-स्नानमेव । नैमित्तिकस्नानेषु रजस्वलाशुद्ध्यादिषु शिरःस्नानम् । तत्रापि पुनः कण्ठस्नानेन शुद्धिः इति सम्प्रदायविदः ।। साक्षाद् गङ्गायां समुद्रस्नाने च शिरःस्नानम् इत्यपि ।।

**प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया ।**
**बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत ।। ४३ ।।**

‘भुवो गोलम्’ इत्यत्र भूः गोलाकारा इति न मन्तव्यम् । भूगोलकं भूमण्डलमिति प्राच्यैः व्याख्याततत्वात् । स्वाश्रमाय न्यवर्तयतेत्यनेन गर्भाधानं स्वसद्मनि (पतिसद्मनि) कर्तव्यमिति सूचयति ।।

**विभज्य नवधाऽत्मानं मानवीं सुरतोत्सुकाम् ।**
**रामां निरमयन् रेमे वर्षपूगान् मुहूर्तवत् ।। ४४ ।।**

'रामां निरमयन्' इत्यत्र 'रामामपि तावद्रूपवतीमपि' इति विजयध्वजीयम् । अपीत्यस्य स्वारस्यं न व्यक्तमित्याधुनिकाः । श्रूयतां स्वारस्यम् । न केवलं स्वात्मानं नवधा विभज्य किन्तु रामां पत्नीमपि तावत्सङ्ख्याकरूपवतीं कृत्वा निरमयन्निति विना आयासेन लभ्यः स्वारसिकोऽर्थः ।।

**एवं योगानुभावेन दम्पत्यो रममाणयोः ।**
**शतं व्यतीयुः शरदः कामलालसयोर्मनाक् ।। ४६ ।।**
**तस्यामाधत्त रेतस्तां भावयन्नात्मनाऽऽत्मवित् ।**
**नवधा विधाय रूपं स्वं सत्यसंकल्पविद् विभुः ।। ४७ ।।**

'शतं व्यतीयुः' इति पूर्वश्लोके उक्त्वा 'तस्यामाधत्त रेतः' इत्यनेन कर्दमस्य वशित्वं व्यक्तं भवति । वशित्वाभावे शरच्छतानन्तरं रेतआधानं कथं घटत इति ।।

**संयोगः संसृतेर्हेतुरसत्सु विहितो धिया ।**
**स एव साधुषु कृतो निःसङ्गत्वाय कल्पते ।। ५५ ।।**

'स एव साधुषु कृत' इत्यत्र इदं ज्ञातव्यम् । भगवद्भक्ते पत्यौ सन्तत्यर्थं कृतोऽपि सङ्गः भक्तिज्ञानद्वारा मोक्षहेतुर्भवति । तदुक्तं विजयदासार्यैः 'पतिय सङ्ग मोक्षके द्वारवेन्नलि बेकु' इति ।। मत्सरिणामेतत्प्रमेयं मनसि आरूढं भवतु वा नवा, सन्तो विदाङ्कुर्वन्तु इत्याशास्महे ।।

**भगवत्प्रसादलब्धकर्दमयोगसामर्थ्यवर्णनात् भगवन्निष्ठत्वं ज्ञेयम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे चतुर्विंशोऽध्यायः**

## अथ पञ्चविंशोऽध्यायः

**मैत्रेय उवाच–**

**निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ।**
**दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ।। १ ।।**

'दयालुः शालिनीमाह' इत्यत्र विरक्तोऽपि अभयं दत्वा प्रव्रजेदिति अनुशासनं द्योत्यते ।।

**तस्यां बहुतिथे काले भगवान् मधुसूदनः ।**
**कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ।। ६ ।।**

'जज्ञेग्निरिव' इत्यत्र भगवान् प्रादुर्भूतः नतु शिशुवत् शुक्रशोणित-विकारदेहवत्वेन जात इत्युच्यते । तत्रेयमाशङ्का । भवतु भगवतः प्रादुर्भावः अमोघवीर्यस्य पितुः वीर्यं किमभवदिति । तत्रेदं समाधानम् । भगवान् स्वशक्त्या शुक्लं विलाप्य स्वयं सच्चिदानन्दविग्रहेण प्रादुर्भवतीति ।।

**ज्ञानविज्ञानयोगेन कर्मणामुद्धरंश्च यः ।**
**हिरण्यकेशः पद्माक्षः पद्ममुद्रापदाम्बुजः ।। १७ ।।**

'हिरण्यकेशः' इत्यादिना विष्णोर्लक्षणमाह । आनन्दमयकेश इत्यर्थः । 'आकेशादानखादानन्दमय' इति श्रुतेः ।।

**तं त्वाभिपृच्छेऽद्य पतिं प्रजानां**
**त्वयाऽवतीर्णेन उताप्तकामः ।**
**परिव्राजां पदवीमास्थितोऽहं**
**चरिष्ये त्वां हृदि युञ्जन् विशोकः ।। ३४ ।।**

'त्वां हृदि मुञ्चन्' इत्यत्र स्वगृहे अवतीर्णं भगवन्तं विहाय कर्दमः किमर्थं परिवव्राजेत्याशङ्कायामिदमुच्यते । भगवन्तमुद्दिश्य मनोयोगं कुर्वन् कर्दमः भगवद्वियोगं नैवाप्तवान् । अत एव विशोक इत्युक्तमिति ।। सन्ति खलु त्रिविधा अधिकारिणः, अवतारदृष्टयः अन्तर्दृष्टयः सर्वत्र दृष्टयश्चेति ।। सर्वत्र दृष्टियोग्यः कर्दमः इति ज्ञायते । 'आत्मानं सर्वभूतेषु भगवन्तमवस्थितम् । अपश्यत्' इति वक्ष्यमाणत्वात् । एतादृशसर्वदर्शनजन्यं सुखं बहिःस्थितैक-रूपदर्शनजन्यसुखादपि वरमिति तादृशदर्शने प्रयत्नं कृतवान् इति ज्ञेयम् । एतादृशयोग्यताभिज्ञो भगवानपि गच्छ काममिति अनुजज्ञे ।।

**आत्मानं सर्वभूतेषु भगवन्तमवस्थितम् ।**
**अपश्यत् सर्वभूतानि भगवत्यपि चात्मनि ।। ४६ ।।**

'आत्मानं सर्वभूतेषु' इत्यत्र 'सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते' इति मन्त्रोक्तप्रकारेण वासुदेवशब्दार्थ उक्तो भवति । यतिभिः उपास्यो वासुदेव इति प्रसिद्धम् ।।

**इच्छाद्वेषविहीनेन सर्वत्र समचेतसा ।**
**भगवद्भक्तियोगेन प्राप्तो भागवतीं गतिम् ।। ४८ ।।**

'इच्छाद्वेषविहीनेन 'इत्यत्र इच्छाद्वेषविहीनत्वं समचेतस्त्वं च ज्ञानिनो लक्षणमभिहितं भवति ।। **कपिलावतारवर्णनेन स्पष्टं भगवन्निष्ठत्वम् ।।** इतः परमास्कन्धसमाप्ति देवहूतिकपिलसंवादः ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे पञ्चविंशोऽध्यायः**

## अथ षड्विंशोऽध्यायः

**तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनम् ।**
**स्वसुतं देवहूत्याह धातुः संस्मरती वचः ।। ६ ।।**

'तमासीनमकर्माणम्' इत्यत्र माता मां पृच्छतु इति बुद्ध्या भगवान् अकर्मा आसीनोऽभवदिति ज्ञेयम् ।।

**देवहूतिरुवाच–**

**निर्विण्णाऽतितरां भूमन्नसदिन्द्रियतर्पणात् ।**
**येन संभाव्यमानेन प्रपन्नाऽन्धंतमः प्रभो ।। ७ ।।**

**य आद्यो भगवान् पुंसामीश्वरो वै भवान् किल ।**
**लोकस्य तमसाऽन्धस्य चक्षुः सूर्य इवोदितः ।। ९ ।।**

**अथ मे देव संमोहमपाक्रष्टुं त्वमर्हसि ।**
**योऽवग्रहोऽहंममेतीत्येतस्मिन् योजितस्त्वया ।। १० ।।**

'निर्विण्णः' इत्यादि देवहूतिवचने निर्विण्णेत्यनेन श्रोत्रानुकूल्यं, 'ईश्वरः' इत्यनेन वक्त्रानुकूल्यम्, 'मे संमोहमपाकर्तुं त्वमर्हसि' इति प्रार्थनेन प्रसङ्गानुकूल्यमुक्तं भवति ।।

**तं त्वा गताऽहं शरणं शरण्यं**
**स्वभृत्यसंसारतरोः कुठारम् ।**
**जिज्ञासया प्रकृतेः पूरुषस्य**
**नमामि सद्धर्मविदां वरिष्ठम् ।। ११ ।।**

'जिज्ञासया प्रकृतेः' इत्यत्र ब्रह्मजिज्ञासा कर्तव्येति ज्ञाप्यते । उत्तराध्याये सृष्टिकथनेन जन्मादिसूत्रार्थवर्णनम् । 'नान्यत्र मद् भगवतः' इत्यादिना भक्त्यर्थं भगवन्महिमोक्तिः ।।

'जीवाः श्रेष्ठाः' इत्यादिना इयदामननाधिकरणार्थः । 'योगस्य लक्षणं वक्ष्ये' इत्यादिना 'आसीनः सम्भवात्' इत्यादिसूत्रार्थः । 'यं यमर्थमुपादत्ते'

इत्यादिना अध्यायद्वयेन वैराग्यार्थे संसारदुःखवर्णनम् । एवमनेकब्रह्म-सूत्रार्थात्मकोऽयं कपिलोपदेशः ।।

**चेतः खल्वस्य बन्धाय मुक्तये चात्मनो मतम् ।**
**गुणेषु सक्तं बन्धाय रतं वा पुंसि मुक्तये ।। १५ ।।**

'चेतः खल्वस्य' इति श्लोकः 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' इत्यस्य व्याख्यानरूपः ।।

**अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसी ।**
**जरयत्याशु या कोशं निगीर्णमनलो यथा ।। ३३ ।।**

'भक्तिः सिद्धेर्गरीयसी' इत्यत्र सिद्धेः अपूर्णमुक्तेः सकाशात् भक्तिः स्वयोग्यतापूर्णभक्तिः गरीयसी गुरुतरा इत्यर्थो द्रष्टव्यः ।।

**नान्यत्र मद् भगवतः प्रधानपुरुषेश्वरात् ।**
**आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ।। ४१ ।।**

**मद्भयाद् वाति वातोऽयं सूर्यस्तपति मद्भयात् ।**
**वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ।। ४२ ।।**

'नान्यत्र' इति श्लोकद्वयेन 'अहमेव भयमोचकः । ममैव भय-कर्तृत्वात्' इत्युक्तं भवति ।। अस्मिन्नध्याये भक्तलक्षणं भक्तिभेदाः भक्त्यर्थं भगवन्महिमोक्तिश्च ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे षड्विंशोऽध्यायः**

तत्वसङ्ख्यानात् भगवत्प्रीतिविशेषसाधनभूतवायुदेवोत्तमत्व-वर्णनाच्च भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे सप्तविंशोऽध्यायः**

## अथ अष्टाविंशोऽध्यायः

**भगवत्कर्तृकबन्धमोक्षवर्णनेन अस्मिन्नध्याये भगवन्निष्ठता ज्ञेया ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे अष्टाविंशोऽध्यायः**

## अथ एकोनत्रिंशोऽध्यायः

**स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम् ।**
**दैवलब्धेन सन्तोष आत्मविच्चरणार्चनम् ।। २ ।।**

'स्वधर्माचरणं शक्त्या' इत्यत्र सर्वधर्माचरणे देवानामेव शक्तत्वात् स्वधर्माचरणं स्वशक्त्यनुसारेण । विधर्मात् निवर्तनं सर्वात्मनेति ध्येयम् । शास्त्रनिषिद्धस्य अल्पस्याप्याचरणे अनर्थप्राप्तेः । तदुक्तं भगवता 'श्रेयान् स्वधर्मो विगुणः पराधर्मात् स्वनुष्ठितात्' 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' इति ।

सप्तमस्कन्धेऽपि 'विधर्मः परधर्मश्च आभास उपमा छलः । अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत् त्यजेत् ।।' इति ।।

**अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ।**
**ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ।। ४ ।।**

'अहिंसा' इत्यत्र अहिंसादयो यमाः । तप आदयो नियमाः ।।

**स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम् ।**
**प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा ।। १९ ।।**

'स्थितम्' इत्यत्र स्थितं रामादिरूपिणम् । व्रजन्तं गरुडवाहनम् । आसीनं लक्ष्मीनृसिंहादिकम् । शयानं रङ्गनाथादिकम् इति विवेकः ।।

**सञ्चिन्तयेद् भगवतश्चरणारविन्दं**
**वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।**
**उत्तुङ्गरक्तविलसन्नखचक्रवाल-**
**ज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ।। २१ ।।**

वज्राङ्कुशेत्यादि । वज्ररेखाध्यानेन पापपर्वतपाटनम् । अङ्कुशध्यानेन मदगजनिरोधः । ध्यजध्यानेन कीर्तिः पताकायते । पद्मध्यानेन लक्ष्मीप्राप्तिरिति अनुसन्धेयम् ।।

**देहं तु तं न चरमं स्थितमुज्झितं वा**
**सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम् ।**
**दैवादुपेतमथ दैववशादपेतं**
**वासो यथा परिकृतं मदिरामदान्धः ।। ३६ ।।**

वासो यथेदि दृष्टान्तः । उत्सवदर्शनसमये स्ववासःस्थितधनापहारेऽपि यथा ज्ञानाभावः तथा हृदि भगवद्दर्शनमहोत्सवे स्वदेहस्यापि अदर्शनमिति गुरुपादाः ।।

**अष्टाङ्गसबीजयोगवर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे एकोनत्रिंशोऽध्यायः**

## अथ त्रिंशोऽध्यायः

**भक्तिलक्षणवर्णनात् तारतम्यवर्णनात् 'भीषास्माद् वातः पवते' इत्यादिश्रुत्युक्तभगवन्महिमावर्णनाच्च अस्याध्याय्स्य भगवन्निष्ठत्वं स्पष्टम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे त्रिंशोऽध्यायः**

## अथ एकत्रिंशोऽध्यायः

**योजनानां सहस्राणि नवतिर्नव चाध्वनः ।**
**त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाम्।। २४ ।।**

'नीतः प्राप्नोति यातनाम्' इत्यत्र गरुडपुराणानुसारेणैवं ज्ञातव्यम् । देहपातानन्तरं त्रिभिर्मुहूर्तैः द्वाभ्यां वा यमदूतैः यमं प्रति नीयते । तत्र विचारणानन्तरं पुनर्मरणस्थलं प्रत्यागतः ऊर्ध्वदेहक्रियानन्तरं प्रेतभावपरिहारे पुनः एकवर्षेण यमलोकं नीतः सकर्मानुसारेण यातनामनुभवतीति ।।

**यास्तामिस्रान्धतामिस्ररौरवाद्याश्च यातनाः ।**
**भुङ्क्ते नरो वा नारी वा मिथः सङ्गेन निर्मिताः ।। २८ ।।**

'यास्तामिस्तान्धतामिस्र' इत्यत्र उच्यमानौ तामिस्रान्धतामिस्रौ अनित्य-नरकौ । ततः पुनरावर्तनोक्त्या तत्समानसंज्ञकौ नित्यनरकौ स्तः, यौ प्राप्य न पुनरावृत्तिः । पञ्चमस्कन्धे अष्टाविंशन्नरकेषु अन्धतामिस्रमपि पठितमिति अनित्यनरकमपि एतत्संज्ञकमस्तीति ज्ञायते ।।

**अत्रोत्तरत्र च भगवद्भक्तिदार्ढ्यहेतुभूतवैराग्यार्थे संसारदुःखवर्णनात् भगवन्निष्ठत्वं ज्ञेयम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे एकत्रिंशोऽध्यायः**

## अथ द्वात्रिंशोऽध्यायः

**सप्तमे जन्मकर्माणि गतानि स्मरते ऋषिः ।**
**जगत्यां यानि देवस्य मायया बन्धमात्मनः ।। ५ ।।**

'जन्मकर्माणि' इत्यत्र सप्तमे मासे ज्ञानोत्पत्तिरुच्यते । 'ऐदने तिङ्गळलि निश्चैसिदे' इति दासरायवाण्यां पञ्चममासे । अत्रापि इदमेव समाधानम् -

'नानाविधा गर्भवृद्धिः' इति भगवत्पादोक्तम् ।।

**सप्तमे जन्मकर्माणि गतानि स्मरते ऋषिः ।**
**जगत्यां यानि देवस्य मायया बन्धमात्मनः ।। ९ ।।**
**अकल्पः स्वाङ्गचेष्टायां शकुन्त इव पञ्जरे ।**
**तत्र लब्धस्मृतिर्दैवात् कर्म जन्मशतोद्भवम् ।**
**स्मरन् दीर्घमनुष्वासं गर्भे किं नाम विन्दते ।। १० ।।**

**नाथमानो ऋषिर्भीतः सप्तवध्रिः कृताञ्जलिः ।**
**स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ।। १२ ।।**

'गतानि स्मरते' इत्यत्र ऋषिरिति विशेषणात् 'तत्र लब्धस्मृतिर्दैवात्' इत्यत्र तादृशविशेषणाभावात् पुनः 'नाथमानो ऋषिर्भीतः' इत्यत्र ऋषि-शब्दप्रयोगात् इदं ज्ञायते । यः पूर्वजन्मनि ज्ञानी तस्यैवेदानीं गर्भस्थस्य तत्वज्ञानोदयः तदनुसारेण भगवत्प्रार्थनं च । अन्यस्य तु केवलमनेकजन्म-गतकर्मस्मरणमिति ।।

**तमात्मनो विजानीयाद् भृत्यापत्यगृहात्मकम् ।**
**दैवोपसादितं मृत्युं मृगयोर्गायनं यथा।। ४४ ।।**

'दैवोपसादितम्' इत्यत्र गुरुपादैरुक्तो भावः । नारीं मारिकां चिन्तयेदिति ।।

**इति श्रीमद्भागवते तृतीयस्कन्धे द्वात्रिंशोऽध्यायः**

## अथ त्रयस्त्रिंशोऽध्यायः

**तच्छ्रद्धयाऽऽक्रान्तमतिः पितृदेवव्रतः पुमान् ।**
**गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ।। ३ ।।**

'चान्द्रमसं लोकं' इत्यत्र चन्द्रलोकः स्वर्गैकदेशः । नतु प्रसिद्धः चन्द्रलोकः । 'गत्वा चान्द्रमसं ज्योतिः योगी प्राप्य निवर्तते' इति गीतायामप्येवमेव । एतदभिप्रेत्यैव 'ईशाद्भक्तो भगवति सुकर्मा स्वर्गमेष्यति' इत्युक्तं तात्पर्यकारैः भगवत्पादैः ॥

**स सङ्गत्य पुनः काले कालेनेश्वरमूर्तिना ।**
**जातेऽगुणव्यतिकरे यथापूर्वं प्रजायते ॥ १३ ॥**

'स सङ्गत्य' इत्यत्र इदमवधेयम् । ब्रह्मा मुक्तैः सह प्रलयकाले भगवन्तं प्रविश्य सुखं भुङ्क्ते । सृष्टिकाले बहिरागत्य श्वेतद्वीपे मोदते । एवं प्रति प्रलयसृष्टिकालम् ॥

**अत्रापि वैराग्यार्थे गत्यादिनिरूपणा ॥**

**इति श्रीमद्भागवते तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः**

## अथ चतुस्त्रिंशोऽध्यायः

**तमेव ध्यायती देवमपत्यं कपिलं हरिम् ।**
**बभूवाविरतोत्साहा निःस्पृहा तादृशे गृहे ॥ २२ ॥**
**ध्यायती भगवद्रूपं यदाह ध्यानगोचरम् ।**
**सुतं प्रसन्नवदनं समस्तव्यस्तचिन्तया ॥ २३ ॥**

'तमेव ध्यायती' इत्यत्र तमिति प्रत्यभिज्ञावचनेन 'सुतं प्रसन्नवदनम्' इत्यत्र सुतशब्देन च इदं ज्ञायते । स्वोपदेशसमये स्वसुतत्वेनावतीर्णं भगवन्तं कपिलं यथा दृष्टवती तथैव ध्यायतीति ॥

**स्वाङ्गं तपोयोगमयं मुक्तकेशं गताम्बरम् ।**
**दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥ २९ ॥**

'मुक्तकेशं गताम्बरम्' इत्यनेन असम्प्रज्ञातसमाध्यवस्था द्योत्यते । कथमन्यथा मानिन्या गताम्बरत्वं युज्यते इति गुरुपादाः ।। तदेवाह भगवान् शुकः- वासुदेवप्रविष्ठधीरिति ।। 'दैवगुप्तम्' इत्यत्र देवमानिता तपश्चरतीति मत्वा देवताभिः रक्षितमित्यर्थः ।।

**तस्यास्तद् योगविधुतमाशु मर्त्यमभूत् सरित् ।**
**स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ।। ३२ ।।**

'मर्त्यमभूत्' इत्यत्र मर्त्यं मरणशीलं शरीरम् । भगवद्ध्यायिनां मनो विलीनं भवति । अस्यास्तु शरीरमेव विलीनमित्यहो ।।

**देवहूतिकृतस्तोत्रेण भागवत्यास्तस्या भगवद्गतिवर्णनेन च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते तृतीयस्कन्धे चतुस्त्रिंशोऽध्यायः**

**।। इति तृतीयस्कन्धः ।।**

**।। इति श्रीतृतीयस्कन्धगतप्रमेयसङ्ग्रहः ।।**

**।। श्रीकमलामाधवार्पणमस्तु ।।**

# अथ चतुर्थः स्कन्धः

## प्रथमोऽध्यायः

**आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः ।**
**पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥ २ ॥**

'अपि भ्रातृमतीम्' इत्यत्रेदं ज्ञातव्यम् । स्वदौहित्रत्वेन भगवान् अवतरिष्यतीति जानन् मनुः भगवतः स्वपुत्रत्वमभिलषमाणः स्वदुहितरं पुत्रिकापुत्रधर्मेणादादिति ॥

**तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः ।**
**इन्द्रः कविर्भुवः स्वाहः सुदेवो रोचनो द्विषट् ॥ ७ ॥**

'सुदेवो रोचन' इत्यत्र रोचनः वाय्ववतारः । स एव स्वारोचिषे इन्द्रत्वमवाप ॥

**सोमोऽभूद् ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् ।**
**दुर्वासाः शङ्करस्यांशो निबोधाङ्गिरसः प्रजाः ॥ ३३ ॥**

'सोमोऽभूत्' इत्यत्र चतुर्मुखब्रह्मणः अंशेन सहितः सोमोऽभूदित्यर्थः । एवं च सोमो न ब्रह्मण अवतारः, किन्तु ब्रह्मांशयुतः अन्यजीवः॥

**अत्रिरुवाच —**

**एको मयेह भगवान् विबुधप्रधान-**
**श्चित्तीकृतः प्रजननाय कथं नु यूयम् ।**
**अत्रागतास्तनुभृतां मनसोऽपि दूरा**
**ब्रूत प्रसीदत महानतिविस्मयो मे ॥ २८ ॥**

**देवा ऊचुः - यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा ।**
**तत्संकल्पस्य ते ब्रह्मन् यद् वै ध्यायसि ते वयम्।। ३० ।।**

‘एको मयेह’ इत्यत्र ‘यद् वै ध्यायसि’ इत्युत्तरे च त्रिमूर्तीनां परस्परमभेदः प्रतीयते । तन्न । बहुप्रमाणविरोधात् । किन्तु अत्रिः यः ब्रह्मान्तर्यामी सृजति, स्वयं विष्णुरूपेण पाति, रुद्रान्तर्यामी लयं करोति स भगवान् मे स्वात्मसमं पुत्रं यच्छतु इति सङ्कल्प्य तपस्तेपे । तदभिप्रायं जानन्तो देवा-स्तदनुगुणमुत्तरमदुरिति ज्ञेयम् ।।

**अग्निष्वात्ता बर्हिषदः सोम्याः पितर आज्यपाः ।**
**साग्नयोऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ।। ६३ ।।**

‘पत्नी दाक्षायणी स्वधा’ इत्यत्र पितृभ्यो दत्ता दाक्षायणी स्वधा अन्या अग्निपत्नीत्वेन प्रसिद्धा स्वधा त्वन्येति ज्ञातव्यम् ।।

**पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ।**
**अप्रौढेवात्मनात्मानमजहाद् योगसंयुता ।। ६६ ।।**

अप्रौढेवेत्यस्यार्थः अस्वीकृतेवेति । अस्वीकृता यथा अपुत्रवती एवं रुद्रेणोढा अपि अपुत्रवती देहं तत्याजेत्यर्थः ।।

**अस्मिन्नध्याये यज्ञदत्तनरनारायणावतारवर्णनात् भागवतीनां देवहूतिकन्यानां दाक्षायणीनां च वंशानां वर्णनाद्भगवन्निष्ठता बोध्या ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे प्रथमोऽध्यायः**

## अथ द्वितीयोध्यायः

**भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ।**
**विद्वेषमकरोत् कस्मादनादृत्यात्मजां सतीम् ।। १ ।।**

'भवे शीलवताम्' इत्यत्रेदं बोध्यम् । जामातरि द्वेषः कारणद्वयेन सम्भावितः । जामातरि किञ्चिद्दोषदर्शनेन वा दुहितर्येव प्रीत्यभावाद्वा । उभयथाऽपि प्रकृतेऽसम्भवः । जामातुर्भवस्य शीलवतां मध्ये श्रेष्ठत्वात् । दक्षस्य दुहितृवत्सलत्वादिति । अतः कस्माद् विद्वेषमकरोदिति प्रश्नोत्थापनार्थं 'भवे' इत्याद्युक्तमिति ॥

**पतिः प्रमथभूतानां तमोमात्रात्मिकात्मनाम् ।**
**तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे ॥ १६ ॥**

**दत्ता बत मया साध्वी चोदिते परमेष्ठिना ॥ १७ ॥**

'दत्ता बत' इत्यत्र मया न दातव्या आसीत् । किन्तु परमेष्ठिप्रचोदनेन दत्ता बत कष्टमिति दक्षस्य प्रजापतेरभिप्रायः । शिवाय कन्यां दत्वा महत् पुण्यं प्राप्तं यत् तदूनमभवदेवं चिन्तनेनेति गुरुपादाः । पुण्यसम्पादनमन्यत्, तद्रक्षणमन्यत् इति ॥

**नन्दिरुवाच —**

**य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ।**
**द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥ २२ ॥**

'तत्वतो विमुखो भवेत्' इति नन्दिशापः पाखण्डिनस्ते भवन्तु सच्छास्त्रपरिपन्थिन इति भृगुशापश्च तात्कालिकः । तत्वज्ञानस्य तत्तत्स्वरूप-योग्यतायत्तत्वात् ॥

**मैत्रेय उवाच —**

**तस्यैवं वदतः शापं भृगोः स भगवान् भवः ।**
**निश्चक्राम ततः किंचिद् विमना इव सानुगः ॥ ३४ ॥**

'विमना इव' इत्यनेन महतो महादेवस्य वैमनस्यं नास्तीति द्योत्यते ।।

**एतदादिसप्तमाध्यायपर्यन्तानां महन्निन्दावर्जनाख्यभागवतधर्मे तात्पर्यात् भगवन्निष्ठता ।।।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे २-३अध्यायौ**

## अथ चतुर्थोऽध्यायः

**कर्म प्रवृत्तं च निवृत्तमप्युत**
**वेदे विविच्योभयलिङ्गमाश्रितम् ।**
**विरोधि तद् यौगपदेककर्तरि**
**द्वयं यथाऽऽब्रह्मणि कर्म नर्च्छति ।। २० ।।**

'कर्म प्रवृत्तं च' इत्यत्र देवानां कर्म प्रवृत्तनिवृत्तविलक्षणमित्युच्यते। तस्य नाम महानियम इति । अधिकं तु तात्पर्यादवगन्तव्यम् ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे चतुर्थोऽध्यायः**

## अथ पञ्चमोऽध्यायः

**एवं स्वदेहं महतां महीयसा**
**मुहुः समारोपितमङ्कमादरात् ।**
**जिहासती दक्षरुषा मनस्विनी**
**दधार गात्रेष्वनिलाग्निधारणम् ।। ३ ।।**

'दक्षरुषा गात्रेष्वनिलं दधार' इत्यनेन संस्कारार्थमपि दक्षो मम देहं न स्पृशेदिति बुद्ध्या स्वयमेवाग्निं दधारेति भावः ।।

**ततः स्वभर्तुश्चरणाम्बुजासवं**
**जगद्गुरोश्चिन्तयती न चापरम् ।**

**ददर्श देहे हतकल्मषा सती**

**सद्यः प्रजज्वाल समाधिजाग्निना ।। ४ ।।**

'नचापरम्' इत्यत्र विष्णुलक्ष्मीवायुभारतीशिवेभ्यः अपरं न ध्यायतीत्यर्थः।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे पञ्चमोऽध्यायः**

## अथ षष्ठोऽध्यायः

**मैत्रेय उवाच —**

**भवो भवान्या निधनं प्रजापते-**

**रसत्कृताया ह्यवगम्य नारदात् ।**

**स्वपार्षदसैन्यं च तदध्वरेशै-**

**र्विद्रावितं क्रोधमपारमादधे ।। १ ।।**

'क्रोधमपारमादधे' इत्यनेन क्रोधाभिमानित्वात् भवस्य न तं क्रोधः पीडते । स्वेच्छयैव अपराधिदक्षादिशिक्षार्थं क्रोधस्वीकार इत्युक्तं भवति ।।

**तं किं करोमीति गृणन्तमाह**

**बद्धाञ्जलिं भगवान् भूतनाथः ।**

**दक्षं सयज्ञं जहि मद्भटानां**

**त्वमग्रणी रुद्र जटांशको मे।। ४ ।।**

जटांशकः जटारूपः वीरभद्रः ।।

**जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान् भवः ।**

**भृगोर्लुलुञ्चे सदसि योऽहसत् श्मश्रु दर्शयन् ।। १९ ।।**

**भगस्य नेत्रे भगवान्पतितस्य रुषा भुवि ।**
**उज्जहार सदस्थोऽक्ष्णा यः शपन्तमसूचयत् ।। २० ।।**

**पूष्णश्चापातयद् दन्तान् कलिङ्गस्य यथा बलः ।**
**शप्यमाने गरिमणि योऽहसद् दर्शयन् दतः ।। २१ ।।**

'योहसत् श्मश्रुदर्शनम्, यः शपन्तमसूचयत्, यो हसत् दर्शयन् दतः' इत्येतैः यथाऽपराधं दण्ड इति सूचितम् ।।

**दृष्ट्वा सञ्ज्ञपने योगं पशूनां स पतिर्मखे ।**
**यजमानपशोः कस्य कायात् तेनाहरच्छिरः ।। २४ ।।**

'दृष्ट्वा संज्ञपने योगम्' इत्यत्र योग उपायः । अयं नरसिंहदेवताको यज्ञः, अत्र दक्ष एव पशुरित्यनुसन्धानरूपः ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे षष्ठोऽध्यायः**

## अथ सप्तमोऽध्यायः

**ब्रह्मोवाच —**

**जाने त्वामीश विश्वस्य जगतो योनिबीजयोः ।**
**शक्तेः शिवस्य च परं यत् तद् ब्रह्म निरन्तरम् ।। ४२ ।।**

'जाने त्वां शक्तेः शिवस्य परम्' इत्यनेन शिवान्तर्यामिणः स्तुतिरिति ज्ञायते । 'त्वाम्'इत्युक्तस्य शिवत्वे तस्य शिवस्य सकाशात् उत्तमत्वस्यानुपपत्तेः । नहि स्वयं स्वस्मादुत्तमो भवति । मिश्रस्तुतिरियम् ।।

**भवान् हि पुंसः परमस्य मायया**
**दुरन्तयाऽस्पृष्टमतिः समस्तदृक् ।**

**तया हतात्मस्वनुकर्मचेत-**
**स्स्वनुग्रहं कर्तुमिहार्हति प्रभो ।। ४९ ।।**

'भवान् हि मायया अस्पृष्टमतिः । मा वधीर्देव भवान् पृथग्विधान्' इत्यत्र चायं भावः । बुद्धिमता अग्रजेन मुग्धे अनुजे ताडिते यथा पिता वदति 'तात, भवान् एतादृशबुद्धिसम्पत्तिमान् मुग्धं बालकं मा ताडीत्' इति एवं पितामहो जगत्पितरं भवं प्रति तद्गुणान् ज्ञापयित्वा प्रशंस्य देवानां ताडनं न कार्यमासीदित्याक्षिपतीति गुरुपादाः । एवं चोदितः शिवः तदाक्षेपभावं जानन् 'दण्डस्तत्र धृतो मया' इति स्वाभिप्रायं प्रकटीकरोति ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे सप्तमोऽध्यायः**

## अथ अष्टमोऽध्यायः

दक्ष उवाच–

**भूयाननुग्रह अहो भवता कृतो मे**
**दण्डस्त्वया मयि धृतो यदपि प्रसह्य ।**
**न ब्रह्मबन्धुषु च वां भगवन्नवज्ञा**
**तुभ्यं हरेश्च कुत एव धृतव्रतेषु ।। १३ ।।**

'भगवन्नवज्ञा' इत्यने ब्राह्मणजातिमात्रा अपि नावज्ञेया इति ज्ञायते । तर्हि किं कर्तव्या इति चेदुपेक्षणीया एवेति ब्रूमः । 'तानुपेक्षेत देवमायाविमोहितम्' इत्युक्तेः ।।।

**स्ववीर्यधारणेऽकल्पां ज्ञात्वा जायां स धूर्जटिः ।**
**उत्ससर्जाम्बरे रेतो गङ्गा जग्राह तन्नदी ।। ६२ ।।**
**पीत्वाऽन्तरजरं वह्निश्चच्छर्द शरकानने ।**
**कुमारोऽभूत् ततस्तस्मै स्तनं षट् कृत्तिका ददुः ।। ६३ ।।**

**षड्भिर्मुखैः स्तनं पीत्वा स बालः षण्मुखोऽभवत् ।**
**ततश्चक्रुः सैन्यपालं सर्वासुरभयंकरम् ।। ६४ ।।**

अत्रेदं तात्पर्यम् । देव्या सह सङ्गते शङ्करे अग्निः देवदूतः अकस्माद् आजगाम । लज्जावशगायां देव्यां स्ववीर्यधारणे अकल्पायाम् आकाशे वीर्यमुत्ससर्ज । तदमोघं गङ्गायां पपात । शिवस्तदग्निमुखे चिक्षेप । तदसहमानोऽग्निः स्वाहायां निदधे । साऽप्यसहमाना शरस्तम्बे चच्छर्द । तस्मादमोघरेतसः कुमारस्य जननम् । कृत्तिकासु स्तनपानार्थं षण्णां मुखानां स्वीकारात् षण्मुखो नाम, अग्निद्वारा आगमनाद् आग्नेयो नाम । वस्तुतः शिवपुत्रः ।।

**दक्षादिस्तुतेः भगवन्निष्ठत्वं ज्ञेयम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**दीर्घं श्वसन्ती वृजिनस्य पारम्**
**अपश्यती बालकमाह बाला ।**
**माऽमङ्गलं तात परेषु मंस्था**
**भुङ्क्ते जनो यत् परदुःखदस्तत् ।। १८ ।।**

'मामङ्गलं तात परेषु मंस्था भुङ्क्ते जनो यत् परदुःखदस्तत्' इत्यनेन सुरुच्या मनः अकल्मषमिति ज्ञायते ।।

**नारदस्तदुपाकर्ण्य ज्ञात्वा चास्य चिकीर्षितम् ।**
**स्पृष्ट्वा मूर्धन्यघघ्नेन पाणिना प्राह विस्मितः ।। २६ ।।**

'अघघ्नेन' इत्यनेन पितृद्वेषनिमित्तदोषपरिहारार्थं मूर्ध्न्यस्पृशत् इत्याह ।।

**जप्यस्तु परमो गुह्यः श्रूयतां मे नृपात्मज ।**
**यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान् ।। ५६ ।।**

'जप्यस्तु परमो गुह्यः' इत्युक्त्वा वासुदेवमन्त्रोपदेशो देवर्षिणा कृत उपलभ्यते । पञ्चवर्षीयस्य अनुपनीतस्य ध्रुवस्य कथं वासुदेवमन्त्राधिकार इति शङ्कायां केचिदाहुः उपनीत एव ध्रुवः प्रागिति । नारद एवोपनीय मन्त्रं दिदेशेत्यपरे । उभयत्रापि मूलं गवेषणीयम् ।।

**देवाश्चक्रुस्तपोविघ्नं त्रासयन्तः स्वमायया ।**
**सर्पेभसिंहकूष्माण्डैस्तान् नापश्यत् परं गतः ।। ८० ।।**

'देवाश्चक्रुस्तपोविघ्नम्' इत्यत्रेदमवधेयम् । दैवैः क्रियमाणो विघ्नः द्विविधः । कीर्तिदानार्थं तपोभङ्गार्थं चेति । तत्राद्ये स्वयं विघ्नं परिहृत्य कीर्तिं ददति । द्वितीये तपोविघाते तात्पर्यवत्वात् भङ्गमेव कुर्वन्तीति ।।

**तस्मिन्नभिध्यायति विश्वमात्मनो**
**द्वारं निरुध्यासुमनन्यया धिया ।**
**लोका निरुच्छ्वासनिपीडिता भृशं**
**सलोकपालाः शरणं ययुर्हरिम् ।। ८४ ।।**

'लोका निरुच्छ्वास' इत्यत्र देवाः स्वयं लोकप्राणनिरोधं कृत्वा ध्रुवस्य कीर्त्यर्थं भगवन्तं शरणं ययुरिति ज्ञातव्यम् । यथा कस्यचिद्बालस्य उत्सवार्थमागता जनास्तस्मिन् बाले अकस्मात् पित्रा ताडिते मनसि पीडिता भवेयुरेवं बाले ध्रुवे वने तपःकुर्वति देवा निरुच्छ्वासनिपीडिता बभूवुरित्येके ।।

**अस्मिन्नध्याये भगवतो वासुदेवस्य उपासनाया वर्णितत्वात् भगवद्भक्तस्य ध्रुवस्य चरित्रवर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे नवमोऽध्यायः**

## अथ दशमोऽध्यायः

**स तं विवक्षन्तमतद्विदं हरि-**
**र्ज्ञात्वाऽस्य सर्वस्य च हृद्यवस्थितः ।**
**कृताञ्जलिं ब्रह्ममयेन कम्बुना**
**पस्पर्श बालं कृपया कपोले ।। ४ ।।**

**स वै तदैव प्रतिपद्य तां गिरं**
**दैवीं परिज्ञातपरात्मनिर्णयः ।**
**तद्भक्तिभावोऽभ्यगृणादसत्वरं**
**परिश्रितोरुश्रवसं ध्रुवक्षितिम् ।। ५ ।।**

'कम्बुना पस्पर्श, 'सवै तदैव प्रतिपद्य' इत्याभ्यामिदमुच्यते । महालक्ष्मीर्हि भगवतः शङ्खरूपेणावस्थिता । सा सुप्तानिन्द्रियदेवानुद्बोधयामास । यथा सुप्तान् स्वपुत्रान् प्रसूः प्रबोधयति एषः तव पिता आगतस्तं पश्यतेति तथेति । देवोत्सव आगतस्तं पश्यतेति वेति । नेदं स्वकपोलकल्पितं, किन्तु 'मम वाचमिमां प्रसुप्ताम्' इति मूल एवोक्तत्वात् सम्प्रदायविद्भिर्गुरुभिरुपदिष्टत्वाच्चावधेयमेव । एवं पूर्वत्रोत्तरत्रापि ज्ञातव्यम् ।।

**या निर्वृतिस्तनुभृतां तव पादपद्म-**
**ध्यानाद् भवज्जनकथाश्रवणेन वा स्यात् ।**
**सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्**
**किम्वन्तकासिलुलितात् पततां विमानात् ।। १० ।।**

'पततां विमानात्' इत्यत्र ल्यब्लोपनिमित्ता पञ्चमी । विमानमधिरुह्य पततां गच्छतामित्यर्थः । विमानादधःपातं प्राप्नुवतामित्यर्थाङ्गीकारे तत्र दुःखप्राचुर्यस्यैव विद्यमानत्वेन सुखतारतम्यकथनायोगादिति साम्प्रदायिकाः ।।

**यस्मिन् विरुद्धगतयोऽप्यनिशं पतन्ति**
**विद्यादयो विविधशक्तय आनुपूर्व्या ।**
**तद् ब्रह्म विश्वभवमेकमविश्वमाद्य-**
**मानन्दमात्रमविकारमहं प्रपद्ये ॥ १६ ॥**

'यस्मिन् विरुद्धगतय' इत्यत्र लोके विरुद्धत्वेन दृश्यमाना अणुत्वमहत्वादयो विष्णौ युगपत् सन्तीति तस्य विरुद्धधर्मधर्मित्वरूपमाहात्म्यमुच्यते ॥

**मतिर्विदूषिता देवैर्यतद्भिरसहिष्णुभिः ।**
**यो नारदवचस्तथ्यं नाग्रहीषमसत्तमः ॥ ३२ ॥**

'मतिर्विदूषिता देवैः' इत्यत्र देवास्तत्तद्योग्यफलानि तत्तत्काले प्रदातुं क्वचित् सतामपि मतिं दूषयन्तीति ज्ञेयम् ॥

**भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः ।**
**तादात्म्यं यच्छतो मौढ्यान्मानो मे भिक्षितं बत ।**
**ईश्वरात् क्षीणपुण्येन पुलकानिव चाधनः ॥ ३५ ॥**

'भवच्छिदमयाचेहं भवम्' इत्यत्र सिंहासनाधिष्ठिततत्वस्यापि संसार-विशेषत्वेन भव एव याचित इत्यभिप्रायः ॥

**सुनीतिः सुरुचिश्चास्य महिष्यौ रुग्मभूषिते ।**
**आरुह्य शिबिके सार्धमुत्तमेनाभिजग्मतुः ॥ ४१ ॥**

'सुरुचिश्च' इत्यनेन हरिप्रसादविशेषेण कुबुद्ध्यपगमनेन सुरुचिरपि ध्रुवमभिजगामेत्युच्यते ॥

**अभिवन्द्य पितुः पादावाशीर्भिश्चानुमन्त्रितः ।**
**ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥ ४५ ॥**

'मातरौ' इत्यनेन ध्रुवस्य सत्स्वभावः स्वस्मै कृतस्यापकारस्य विस्मरण-रूपः द्योत्यते । तदुक्तं 'सज्जनाग्रणीः' इति ।।।

**सुरुचिस्तं समुत्थाप्य पादावानतमर्भकम् ।**
**परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ।। ४६ ।।**

'सुरुचिस्तं परिष्वज्याह जीव' इत्यत्रेदमवधेयम् । पूर्वं या सुरुचिः 'सिंहासनमधिरोढुमिच्छसि चेत् मदुदरे त्वया जनितव्यम्' इत्युक्तवती तद्वचनद्वारा 'मर' इत्यभिप्रेतवती । मरणं विना जननस्य असम्भवात् । सैव सुरुचिरिदानीं जीवेत्याह । तस्य हेतुर्यस्य प्रसन्नो भगवनानिति उत्तरश्लोके वक्ष्यत इति ।।

**लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ।**
**आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत् पुरम्।। ५३ ।।**

'ध्रुवं सभ्रातरं करिणीम्' इत्यनेन एकस्य बालस्य उत्सवे तत्समानवयस्कस्य अन्यस्यापि उत्सवः कर्तव्य इति सूच्यते ।।

**ध्रुवकृतस्तोत्रवर्णनेन वासुदेवावतारकथनेन भगवद्भक्तिमहिमा-वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे दशमोऽध्यायः**

## अथ एकादशोऽध्यायः

**मनुरुवाच–**

**अलं वत्सातिरोषेण तमोद्वारेण पाप्मना ।**
**येन पुण्यजनानेतानवधीस्त्वमनागसः ।। ३७ ।।**

मनुकृतोपदेशविषये अयं बोध्यः । सन्ति हितोपदेष्टारो द्विविधा गुरवः पितरश्चेति । तत्र गुरवः प्रायः परलोकविषयकहितोपदेष्टारः । पितरस्तु प्राय

इहलोकविषयकहितोपदेष्टारः । मनुस्तु ध्रुवस्य गुरुस्थाने पितृस्थाने च स्थित उभयलोकविषयकहितोपदेष्टा इति । गुरुवचनकरणे परलोके सुखावाप्तिः । पितृवाक्यकरणे इहलोके सुखावाप्तिः । उभयवचनकरण उभयत्र सुखावाप्तिः । अकरणे दुःखावाप्तिरिति विवेको गुरुपादोक्तप्रकारेणानुसन्धेयः ।।

**तमेव मृत्युममृतं तात दैवं**
**सर्वात्मनोपैहि जगत्परायणम् ।**
**यस्मै बलिं विश्वसृजो हरन्ति**
**गावो यथा वै नसि दामयन्त्रिताः ।। ५७ ।।**

'सर्वात्मनोपैहि' इत्यत्र 'उपैहि' इति पाठात् 'अवैहि' इत्यपि साधुरेवेति ज्ञायते । तेन 'अवैहीति असाधु'रिति भणन् असाम्प्रदायिक इत्युपेक्ष्य एव ।।

**मनुकृतोपदेशव्याजेन भगवत्प्रीतिसाधनवर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे एकादशोऽध्यायः**

## अथ द्वादशोऽध्यायः

**मैत्रेय उवाच–**

**स राजराजेन वराय चोदितो**
**ध्रुवो महाभागवतो महामतिः ।**
**हरौ स वव्रेऽचलितां स्मृतिं यया**
**तरत्ययत्नेन दुरत्ययं तमः ।। ८ ।।**

'स वव्रे अचलितां स्मृतिम्' इत्यत्र यो ध्रुवः पूर्वं सिंहासनं भिक्षित्वा 'अहो बत ममानात्म्यम्' इत्यादिना पश्चात्तप्तवान् सोऽद्य जागरूको भगवत्स्मृतिं वव्रे इति ज्ञातव्यम् ।।

**आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोश-**
**मन्तःपुरं परिविहारभुवश्च रम्याः ।**
**भूमण्डलं जलधिमेखलमाकलय्य**
**कालोपसृष्टमिति स प्रययौ विशालाम् ।। १६ ।।**

'भूमण्डलं जलधि' इत्यत्र एतादृशाखण्डभूमण्डलाधिपतय आखण्डलैश्वर्य-युक्ता अपि सर्वं नश्वरं मत्वा भगवन्तं शरणं ययुः । अतः साधकेन वित्त-पुत्रमित्रधरित्रीकलत्रादिषु विरक्तेन भाव्यमिति सूच्यते ।।

**तस्या विशुद्धकरणः शिववार्विगाह्य**
**बद्धासनो जितमरुन्मनसाऽऽहृताक्षः ।**
**स्थूले दधार भगवत्प्रतिरूप एतद्**
**ध्यायंस्तदव्यवहितो व्यसृजन् समाधौ ।। १७ ।।**

'स्थूले दधार' इत्यत्र प्रथमं स्थूलरूपोपासनं पश्चात् सूक्ष्मरूपोपासनमिति क्रमः प्रदर्शितः ।।

**तं कृष्णपादाभिनिविष्टचेतसं**
**बद्धाञ्जलिं प्रश्रयनम्रकन्धरम् ।**
**सुनन्दनन्दावुपलभ्य सम्मितं**
**प्रीत्योचतुः पुष्करनाभसंमतौ ।। २२ ।।**

'सुनन्दनन्दौ' इत्यनेन पश्चिमद्वारेण भगवन्मन्दिरप्रवेशो ध्रुवस्ये-त्येतत्सूच्यत इति भाति ।। अत्र महान्तः प्रष्टव्याः ।।

**स च स्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुवः ।**
**अन्वस्मरदहं हित्वा नैनां यास्ये त्रिविष्टपम् ।। ३१ ।।**

'स च स्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुवः अन्वस्मरत्' इत्यनेन सुपुत्रलक्षणः सुपुत्रावाप्तिफलं च सूचितम् ।।

**विष्णुभक्तस्य ध्रुवस्य गतेर्वर्णनात् भगवन्निष्ठत्वमत्राध्याये ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे द्वादशोऽध्यायः**

## अथ त्रयोदशोऽध्यायः

**अस्मिन्नध्याये भगवद्भक्तिदार्ढ्यहेतुवैराग्यार्थम् अङ्गराजविरक्तिवर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे त्रयोदशोऽध्यायः**

## अथ चतुर्दशोऽध्यायः

**तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः ।**
**योऽपाहरज्जायमानो वेनकल्मषमुल्बणम् ।। ४७ ।।**

'योऽपाहरज्जायमानः' इत्यत्रेदमवसेयम् । वेने त्रयोंऽशा आसन् । तत्र तामसांशो निषादरूपेण बहिर्गतः । सात्विकांशः पृथुरूपेण । राजसांसः पृथ्वाख्यपुत्रपुण्यवशात् स्वर्गं गतः । स्वयं वेनः तमःप्रापेति ।।

**ऋषय ऊचुः –**

**एष विष्णोर्भगवतः कला भुवनपावनी ।**
**इयं च लक्ष्मीः सम्भूतिः पुरुषस्यानपायिनी ।। ५० ।।**

'इयं च लक्ष्मीः' इत्यत्र एवं ज्ञातव्यम् । साक्षाल्लक्ष्मीः साक्षाद्भगवत एव पत्नी भवति । क्वचित् लक्ष्म्याविष्ठा काचन साक्षाद्भगवतः पत्नी भवेत् यथा जाम्बवत्यादयः । क्वचित् लक्ष्माविष्टा काचन भगवदाविष्टस्य हरेः पत्नी भवेत् । यथा अर्चिः पृथोः । किन्तु साक्षाल्लक्ष्मीः कदापि भगवदाविष्टस्य पत्नी नैव भवेत् । अतः इयं लक्ष्मीः इत्यस्य लक्ष्म्याविष्ठा इत्यर्थो ज्ञेयः ।।।

अत्राध्याये विष्णुसेवाफलस्य तन्निन्दाफलस्य विष्ण्वाविष्ठ-पृथुजन्मनश्च वर्णनात् भगवन्निष्ठत्वं बोध्यम् ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे चतुर्दशोऽध्यायः**

## अथ पञ्चदशोऽध्यायः ।

**एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ।**
**इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ।। ३ ।।**

'एष साक्षाद्' इत्यस्य विशेषतः हरिसन्निधानवानित्यर्थः । साक्षान्मुख्यतो हरेरंशः भिन्नांशः भिन्नांशेषु प्रतिबिम्बभूतेषु मुख्यः । मुख्यत्वं हरिसन्निधानादिति भावः ।।

**पृथुरुवाच–**

**हे सूत हे मागध सौम्य बन्दिन्**
**लोकेऽधुनाऽस्पष्टगुणस्य मे स्यात् ।**
**किमाश्रयो मे स्तव एष योज्यतां**
**मा मय्यभूवन् वितथा गिरो वः ।।१९।।**

'हे सूत' इत्यादिना आत्मप्रशंसा वर्ज्येत्युच्यते ।।

भगवदाविष्टस्य पृथोः पट्टाभिषेकवर्णनात् भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे पञ्चदशोऽध्यायः**

## अथ षोडशोऽध्यायः

सूतवचनव्याजेन पृथुगुणक्रियाणां सङ्ग्रहात् भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे षोडशोऽध्यायः**

## अथ सप्तदशोऽध्यायः

आत्रयोविंशाध्यायं पृथोरुपाख्यानम् । हरेर्विशेषसन्निधानादेव पृथोः धरानुयानादिकं युज्यते । अन्यथा शतश्लोकराजसु पठितस्य तस्य शेषशत-स्थमध्यपतितधराया निग्रहो न घटेत ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे सप्तदशोऽध्यायः**

## अथ अष्टादशोऽध्यायः

पात्रवत्सदोग्धृभेदेन क्षीरस्य नानात्वं युज्यते ।।

**पृथुकृतगोदोहनमाहात्म्यकथनात् भगवन्निष्ठत्वम् ।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे अष्टादशोऽध्यायः**

## अथ एकोनविंशोऽध्यायः

**तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः ।**
**शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ।। २ ।।**

'कर्मातिशयमात्मनः शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम्' इत्यत्र शतक्रतुरिन्द्रः पृथोर्यज्ञमहोत्सवं पृथुकर्तृकाश्वमेधशतकरूपमुत्सवम् आत्मनः स्वस्य अतिशयम् अतिशयितं कर्म न ममृषे इति योजना । अनेन अश्वमेध-शतकानुष्ठानमिन्द्रोचितमतिशयं कर्म । तादृशं कर्म चक्रवर्तिना अनुष्ठीयमानं दृष्ट्वा न ममृषे इति भावः ।। अत एव ब्रह्मणा शततमाश्वमेधनिषेधसमये 'अलं ते क्रतुभिः शिष्टैर्यद् भवान् मोक्षधर्मवित्' इत्युक्तम् ।।

**इति चाधोक्षजेशस्य पृथोर्यज्ञमहोदयम् ।**
**असूयन् भगवानिन्द्रः प्रतिघातमचीकरत् ।। १० ।।**

**चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।**
**वैन्ये यज्ञपशुं स्पर्धन्नपोवाह तिरोहितः ।। ११ ।।**

'असूयन् भगवनानिन्द्रः' इत्यत्र असूयन् असहमान इत्यर्थः । अत्रापि 'असूया गुणेषु दोषारोपः' इत्यर्थो न ग्राह्यः । महात्मनि इन्द्रे तादृशासूयाया अभावात् । किन्तु असहनमिति गौणोऽर्थः स्वीकर्तव्यः । असूयाग्रस्तो यथा परगुणान् न सहते एवं पृथोरयोग्यस्य चरमाश्वमेधस्य असहनमिति । उत्तरश्लोके 'स्पर्धन्' इत्यस्यापि एवमेव स्पर्धन्निवेत्यर्थो ग्राह्यः ।।

**उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः ।**
**चषालयूपयोश्छन्नो हिरण्यरशनं विभुः ।। १९ ।।**

'तम उपसृज्य' इत्यनेन तमो नाम द्रव्यविशेष इति ज्ञायते । अह्नि क्रियमाणे यज्ञे आलोकहरणेन आलोकाभावप्राप्तेरयोगात् ।।

**पृथुकीर्तिः पृथो भूयास्त्वं ह्येकोनशतक्रतुः ।**
**अलं ते क्रतुभिः शिष्टैर्यद् भवान् मोक्षधर्मवित् ।। ३२ ।।**

'मोक्षधर्मवित् 'इत्यत्र मोक्षधर्मः तारतम्यम् । तव तारतम्यज्ञानित्वात् इन्द्रादवरोऽहमिति मत्वोपशमं व्रजेतेति भावः ।।

**भगवदाविष्टपृथुयज्ञवर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे एकोनविंशोऽध्यायः**

## अथ विंशोऽध्यायः

**श्रीभगवानुवाच –**

**एष ते ह्यकार्षीद् भङ्गं हयमेधशतस्य ह ।**
**क्षमापयत आत्मानममुष्य क्षन्तुमर्हसि ।। २ ।।**

'क्षमापयत आत्मानम्' इत्यत्र आत्मानं त्वदन्तर्यामिणं मामित्यर्थः । देवेन्द्रस्य पृथुचक्रवर्तिनं प्रति क्षमायाचनायोगात् ।।

**असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे ।**
**अपत्ये द्रविणे दारे कः कुर्यान्ममतां बुधः ।। ६ ।।**

'असंसक्तः शरीरेऽस्मिन्' इत्यत्र शरीरमेवास्माकं न, दूरे अपत्यादय इति भावः ।।

**स्पृशन्तं पादयोः शीर्ष्णा व्रीडितं स्वेन कर्मणा ।**
**शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ।। १९ ।।**

'व्रीडितम्' इत्यत्र व्रीडितमिव प्रदर्शयन्तमित्यर्थः ।।

**अथाभजं त्वाऽखिलपूरुषोत्तमं**
**गुणालयं पद्मकरेव लालसः ।**
**अप्यावयोरेकपतिस्पृधोः कलि-**
**र्न स्यात् कृतस्त्वच्चरणैकतानयोः ।। २८ ।।**

'अप्यावयोरेकस्पतिस्पृधोः कलिर्न स्यात्' इत्यत्र

'यथा श्रीर्नित्यमुक्तापि प्राप्तकामापि सर्वदा ।
उपास्ते नित्यशो विष्णुमेवं भक्तो हरेर्भवेत्'

इत्युक्तप्रकारेण निष्कामभगवदुपासनैव पृथुना कामिता नतु स्वलक्ष्म्योः कलहाभाव इति ज्ञेयम् ।। लक्ष्म्यां स्पर्धादिदोषणां शङ्कानर्हत्वात् ।।

**पृथुभगवत्संवादरूपत्वादस्याध्यायस्य भगवन्निष्टत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे विंशोऽध्यायः**

## अथ एकविंशोऽध्यायः

**अश्नात्यनन्तः खलु तत्त्वकोविदैः**
**श्रद्धाहुतं यन्मख इज्यनामभिः ।**
**न वै तथा चेतनया बहिष्कृते**
**हुताशने पारमहंस्यवर्यगुः ।। ४० ।।**

'न वै तथा चेतनया' इत्यत्र अचेतनाधिष्ठानात् चेतनाधिष्ठानं विशेषेण पूजनीयमित्युक्तं भवति । तर्हि अग्नौ होमादपि सारमेयस्य अन्नदानं वरं किमित्यत आह-पारमहंस्यवर्यगुरिति ।। पारमहंस्याः परमहंसाः । 'स्वार्थे ष्यञ्' सौख्यमिति वत् । तैः वर्याः वरणीयाः गावः वाचः यस्य सः । परमहंसा हि भगवत्सम्बन्धिनीः वाचो वरयन्ते । अतस्तद्भोजने तत्कृतभगवद्विषयक-वाग्व्यापारस्य सहायो भवतीति तद्भोजनस्य अग्नौ होमादपि वरत्वमिति गुरुपादाः ।।

**पुत्रेण जयते लोक इति सत्यवती श्रुतिः ।**
**ब्रह्मदण्डहतः पापो यद् वेनोऽत्यतरत् तमः ।। ४५ ।।**

'वेनोऽत्यरत्तमः' इत्यत्र वेनदेहस्थो राजसो जीव इत्यर्थः । अन्यथा 'स्वयं तु तम एवाप' इति निर्णयाचार्यवचनविरोधात् ।।

**हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।**
**विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः ।। ४६ ।।**

'विविक्षुः' इत्यत्र वेष्टुमिच्छुरिति नार्थः । नहि कश्चित् तमःप्रवेशम् इच्छति । किन्तु प्रवेशोन्मुख इति गौणोऽर्थः स्वीकार्यः । इयं च रूढगौणी मुमूर्षुरितिवत् ।।

**भगवदाविष्टपृथोः आपादमौलिवर्णनेन तत्कृतोपदेशेन च अस्य भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे एकविंशोऽध्यायः**

## अथ द्वाविंशोऽध्यायः

**तदहं कृतविश्रम्भः सुहृदोऽत्र तपस्विनाम् ।**
**संपृच्छे भव एतस्मिन् क्षेमः केनाञ्जसा भवेत् ।। १९ ।।**

'सम्पृच्छे भव एतस्मिन् क्षेमः केनाञ्जसा भवेत्' इत्यत्र महत्समागमे सति एवमेव जिज्ञास्यमिति सूचितम् ।।

**शास्त्रेष्वियानेव सुनिश्चितो नृणां**
**क्षेमस्य सम्यग् विमृशेषु हेतुः ।**
**असङ्ग आत्मव्यतिरिक्तवस्तुनि**
**दृढा रतिर्ब्रह्मणि निर्गुणे च या ।। २१ ।।**

'असङ्ग आत्मव्यतिरेक वस्तुनि' इत्यनेन वैराग्यं, 'दृढा रतिर्ब्रह्मणि निर्गुणे च या' इत्यनेन हरिभक्तिश्च मोक्षसाधनमित्युक्तम् । तथाहि भगवत्पादैः 'वैराग्यतो भक्तिदार्ढ्यं तेनोपासा यदा भवेत्' इत्याद्युक्तम् ।।

**प्राणा दाराः सुता ब्रह्मन् गृहाश्च सपरिग्रहाः ।**
**रायो मही बलं कोश इति सर्वं निवेदितम् ।। ४७ ।।**

'प्राणाः दाराः .. इति सर्वं निवेदितम्' इत्यत्र कथं दारसमर्पणमिति चेत् मम दारा अपि भगवत्सेवार्था इति ।।

**यैरीदृशी भगवतो गतिरात्मवाद**
**एकान्ततो निगमिभिः प्रतिपादिता नः ।**

**तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं**
**को नाम तत् प्रतिकरोति विनोदपात्रम् ।। ५० ।।**

'यैरीदृशी' इत्यत्र गुरुकृतोपकारार्थं दक्षिणाप्रतिपादनेन नैर्ऋण्यमशाक्यमित्युक्तम् ।।

**अत्र सनत्कुमारेण मोक्षधर्मवर्णनात् पृथोर्गुणवर्णनाच्च भगवन्निष्ठत्वम् वेदितव्यम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे द्वाविंशोऽध्यायः**

## अथ त्रयोर्विंशोऽध्यायः

**तत्रापाद्यात्मनियमो वैखानससुसम्मते ।**
**आरब्ध उग्रतपसि यथा स्वविषये पुरा ।। ४ ।।**

**कन्दमूलफलाहारः शुष्कपर्णाशनः क्वचित् ।**
**अब्भक्षः कतिचित्पक्षान् वायुभक्षस्ततः परम् ।। ५ ।।**

'वैखानससुसम्मते उग्रतपसि' इत्यक्तम् । तद्विवृतं- 'कन्दमूलफलाहार' इति । 'वैखानसाः मूलभक्षाः' इत्युक्तेः ।।

**ग्रीष्मे पञ्चतपा वीरो वर्षास्वासारषाण्मुनिः ।**
**आकण्ठमग्नः शिशिर उदके स्थण्डिलेशयः ।। ६ ।।**

'ग्रीष्मे पञ्चतपाः' इति ।

'ग्रीष्मे पञ्चाग्निमध्यस्थः वर्षासु स्थण्डिले शयः ।
अप्सु वासस्तु हेमन्ते तपोवृद्धिं क्रमात् चरेत्' इत्यन्यत्र ।।

**भगवद्भक्तिहेतुभूतपृथुचरितवर्णनेन भगवन्निष्ठत्वं बोध्यम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे त्रयोविंशोऽध्यायः**

## अथ चतुर्विंशोऽध्यायः

**अथ भागवता यूयं प्रियाः स्थ भगवान् यथा ।**
**न मे भागवतानां च प्रेयानन्योऽस्ति कर्हिचित्।। ३० ।।**

'अथ भागवताः' इत्यत्र यथा अहं भगवद्भक्तः तथा भगवद्भक्तेष्वपि प्रीतिमानित्युच्यते ।

**भगवन्महिमाविशेषप्रतिपादकरुद्रगीतावर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे चतुर्विंशोऽध्यायः**

## अथ पञ्चविंशोऽध्यायः

**नारद उवाच–**

**गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः ।**
**न परं विन्दते मूढो भ्राम्यन् संसारवर्त्मसु ।। ६ ।।**

'गृहेषु कूटधर्मेषु' इत्यादिना नारदेन कर्मनिन्दनं कर्मणोऽपि ज्ञानस्य प्राशस्त्यप्रतिपादनार्थम् । नतु कर्म नाचरणीयमिति भावेन ।।

**एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव ।**
**सम्परेतमयः कूटैश्छिन्दन्त्युत्थितमन्यवः ।। ८ ।।**

'एते त्वां सम्प्रतीक्षन्ते' इत्यत्र एते एतत्सदृशा इत्यर्थः । एतेषामेव परलोके आगमनस्य असम्भावितत्वादिति गुरुपादाः ।।

**आसीत् पुरञ्जनो नाम राजा राजन् बृहच्छ्रवाः ।**
**तस्याविज्ञातनामाऽऽसीत् सखाऽविज्ञातचेष्टितः ।। १० ।।**

‘आसीत् पुरञ्जनो नाम’ इत्यत्र पुरञ्जनो नाम मध्यमजीवाभिमानी प्रमदेत्यादयः मध्यमजीवबुद्ध्याद्यभिमानिनः । अस्मिन्नुपाख्याने पुरञ्जनस्य वैयक्तिककथाऽपि वर्तते । तदन्तर्गता आध्यात्मिकी कथाऽपि वर्तत इति ज्ञातव्यम् ।।

वक्ष्यमाणप्रकारेण यद्यदाध्यात्मिकपरत्वेनोन्नेतुं शक्यं तत्सर्वं तथा कार्यम् । अन्यत् तस्य वैयक्तिकविषयमिति ज्ञातव्यम् । यथा कुपितायाः प्रमदाया अनुनयः ।।

**एतदध्यायम् आरभ्य अध्यायपञ्चके मोक्षसाधनीभूतभगवत्-प्रसादार्थं ज्ञानं सम्पादनीयमिति वर्णनात् तदुपयोगिजीवसंसार-कथनाच्च भगवन्निष्ठत्वम् ।।**

सुखेन बुद्धावारोहाय अभिमान्यभिमान्यसम्बन्धनिबन्ध आध्यात्मिकार्थः सङ्गृह्यते ।।

पुरञ्जनः जीवः । प्रमदा बुद्धिः । दश भृत्या इन्द्रियाणि दश । तेषां परिवृढः मनः । तत्स्त्रियः इन्द्रियवृत्तयः । पञ्चशीर्षाहिः पञ्चप्राणाः । नवद्वारा पुरी मनुष्यदेहः । पूर्वद्वाराः अक्षिणी नासिके वदनं च । पश्चिमद्वारौ मूत्रगुदद्वारौ । दक्षिणद्वारः वामकर्णम् । उत्तरद्वारः दक्षिणकर्णम् । तत्रायं विवेकः ।।

खद्योताविर्मुखी नेत्रे । विभ्राजितः रूपम् । द्युमान् चक्षुः ।।

नलिनी नालिनी नासिके । सौरभः गन्धः । अवधूतः घ्राणः ।।

मुख्या मुखम् । आपणबहूदनौ व्यवहार-भोजने । विपणो वाक् रसज्ञो रसना ।।

पितृभूः दक्षिणकर्णम् । दक्षिणपाञ्चालः प्रवृत्तशास्त्रम् । श्रुतधरः श्रोत्रम्

देवभूः उत्तरकर्णम् । उत्तरपाञ्चालः निवृत्तशास्त्रम् । श्रुतधरः श्रोत्रम्

आसुरी मेहनम् । ग्राम्यकः व्यवायः । दुर्मदः उपस्थः ।।

निर्ऋतिः गुदः । वैशसः नरकः । लुब्धकः पायुः ।।

अन्धौ हस्तपादौ ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे पञ्चविंशोऽध्यायः**

## अथ षड्विंशोऽध्यायः

रथो देहः । अश्वाः पञ्चेन्द्रियाणि । चक्रे द्वे कर्मणी पुण्यपापे वा प्रवृत्तिनिवृत्ते वा । वेणवः गुणत्रयम् । बन्धुराः असवः । रश्मिः मनः । सूतः बुद्धिः । नीडः हृदयम् । कूबरौ द्वन्द्वौ । प्रहरणानि विषयाः । वरूथानि धातवः । विक्रमः आकूतिः । चमूनाथा एकादशेन्द्रियाणि । अक्षयेषुधिः अनन्तवृत्त्याश्रयमन्तःकरणम् । पञ्चप्रस्थवनं पञ्चेन्द्रियजन्यसुखभ्रमः । मृगया पञ्चसूनाः ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे षड्विंशोऽध्यायः**

## अथ सप्तविंशोऽध्यायः

चण्डवेगः संवत्सरः । गन्धर्वा अहानि । गन्धर्व्यः रात्रयः । पाञ्चालाः पञ्चविषयाः । कालकन्या जरा । यवनेश्वरः मृत्युः । सैनिकाः आधिव्याधयः । प्रज्वारः ज्वरः ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे सप्तविंशोऽध्यायः**

## अथ अष्टाविंशोऽध्यायः

अविज्ञातसखः परमात्मा ।।

**उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ।**
**युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः।। २९ ।।**

'उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः' इत्यत्र पुरञ्जनो वैदर्भी । पुरञ्जनी एव मलयध्वज इति प्रचलितविजयध्वजीयपाठादवगम्यते । किन्तु स्त्रियाः कदाचिन्न पुरुषजन्मेति तात्पर्यनिर्णयविरोधात् न्यायदीपिकानवमाध्याये 'येऽपि स्युः पापयोनयः । स्त्रियो वैश्याः' इत्यस्य व्याख्यानावसरे श्रीराघवेन्द्रस्वामिपादै-रपि तथैव प्रतिपादनात् किञ्चित् प्रामादिकं प्रचलितपाठे ऊहनीयमिति गुरुपादाः ।।

**एकैकस्याभवत् तेषां राजन्नर्बुदमर्बुदम् ।**
**भोक्ष्यते यद्वंशधरैर्मही मन्वन्तरं परम्।। ३१ ।।**

'एकैकस्याभवत्' इत्यत्र एकस्माद् देहात् बहूनि कर्माणि सञ्चीयन्ते इत्याध्यामिकोऽर्थ इति गुरुपादाः ।।

**पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम् ।**
**षट्कलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम् ।। ५६ ।।**
**पञ्चेन्द्रियार्था आरामा द्वारो घ्राणादयः प्रभो ।**
**तेजोबन्नानि कोष्ठानि गोलकेन्द्रियसंग्रहः ।। ५७ ।।**

'पञ्चाराम'मिति श्लोकद्वयोक्तं सुखेन बुद्धावारोहाय सङ्गृह्यते । आरामाः विषयाः । नवद्वारा घ्राणादयः । पालः जीवः । कोशानि तेजोऽबन्नानि । कूलानि गोलकानि । विपणाः कर्मेन्द्रियाणि । प्रकृतयः पञ्चभूतानि । स्त्री बुद्धिः।।

**अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भो ।**
**न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ।। ६२ ।।**

'अहं भवान्' इत्यत्रैवमन्वयः । अहं भवान्न च किन्तु अन्यः । त्वं त्वमेव । अहंमहमेवेति विचक्ष्व इति ।।

**यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ।**
**द्विधाभूतमिवेक्षेत तथैवान्तरमावयोः ।। ६३ ।।**

'तथैवान्तरमावयोः' इत्यत्र बिम्बप्रतिबिम्बयोर्यथाऽन्तरं भेदः, तथैव आवयोरन्तरम् । आवां बिम्बप्रतिबिम्बत्वमापन्नाविति भावः ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे अष्टाविंशोऽध्यायः**

## अथ एकोनविंशोऽध्यायः

**इति वेदविदां वाचः श्रूयन्ते तत्र तत्र ह ।**
**कर्म च क्रियते प्रोक्तं परोक्षं न प्रकाशते ।। ६१ ।।**

**नारद उवाच–**

**येनैवारभते कर्म तेनैवामुत्र तत् पुमान् ।**
**भुङ्क्ते ह्यव्यवधानेन लिङ्गेन मनसा स्वकम् ।। ६२ ।।**

'कर्म च क्रियते प्रोक्तं परोक्षं न प्रकाशते' इत्यत्र राजप्रश्नस्य एतद्देहेन कृतस्य कर्मणः समनन्तरमेव नाशात् अन्यदेहेन फलभोजनं कथं कारणाभावादित्यशयः ।।

'येनैवारभते' इति नारदोत्तराशयस्तु मनोव्यापारं विना न कर्मारम्भः । तथाच येन मनसा कर्म कृतं तज्जन्यमदृष्टं मनसि वर्तते । तेन मनसा अन्यस्मिन् देहे फलभोजनम् । कर्मणः अनित्यत्वेऽपि एकस्यैव मनसः देहान्तरे प्रवेशनादिति ।।

'कर्म च क्रियते प्रोक्तम्' इत्यत्र कर्म क्रियते नश्यति च । फलमुत्तरभावि । तत्र कारणस्य कर्मणः अविद्यमानत्वात्कथं फलरूपकार्यमिति प्रश्नाशयः । 'येनैवारभते' इत्यत्र कर्मणो नाशेऽपि तज्जन्यपुण्यपापरूपादृष्टस्य मनसि

स्थितत्वेन तन्मनसो जीवानुगमनेन देहान्तरे फलप्राप्तिरिति परिहाराभिप्रायः ।।

**मन एव मनुष्यस्य पूर्वरूपाणि शंसति ।**
**भविष्यतश्च भद्रं ते तथैव नभविष्यतः ।। ६८ ।।**

'मन एव' इत्यत्र स्वमनःपरीक्षणे सति पूर्वं किमभवत् उत्तरत्र किं भविष्यतीति ज्ञानं सुकरमित्युच्यते ।।

**गर्भे बाल्येऽप्यपौष्कल्यादेकादशविधं तदा ।**
**लिङ्गं न दृश्यतेऽयूनः कुह्वां चन्द्रमसो यथा ।। ७४ ।।**

'गर्भे बाल्येऽप्यपौष्कल्यात्' इत्यत्र गर्भादिषु अभिमानस्य अल्पत्वात् मनसोऽल्पमावरणं यौवने अभिमानस्य बहुत्वात् भूर्यावरणमित्युच्यते । तत्र दृष्टान्तः कुह्वामिति । कुहूः अमावास्या । प्रतिपदादौ स्वल्पं चन्द्रा-दर्शनममावास्यां तु पूर्णं चन्द्रादर्शनमिति ।।

**भगवत्प्राप्तिरूपमोक्षार्थमावश्यकस्य वैराग्यस्य ज्ञानस्य चोपदेशात् भगवन्निष्ठत्वं बोध्यम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे एकोनविंशोऽध्यायः**

## अथ त्रिंशोऽध्यायः

**दिव्यवर्षसहस्राणां सहस्रमहतौजसः ।**
**भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान्मम।। १७ ।।**

'दिव्यवर्षसहस्राणा'मित्यत्र सहस्रशब्दो बहुत्ववाची । प्रचेतोभिर्द्वादश-लक्षवर्षाणि पृथ्वी पालितेति तात्पर्योक्तेः ।।

**प्रचेतस्स्तोत्रव्याजेन भगवन्महिमावर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते चतुर्थस्कन्धे त्रिंशोऽध्यायः**

## अथ एकत्रिंशोऽध्यायः

दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ।
प्रतीच्यां दिशि वेलायां सिद्धोऽभूद् यत्र जाजलिः।। २ ।।

'दीक्षिता ब्रह्मसत्रेण' इत्यत्र ब्रह्मसत्रं संन्यासः ।।

नारदोपदेशव्याजेन हरिभक्तेः मोक्षसाधनोत्तमत्ववर्णनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते चतुर्थस्कन्धे एकत्रिंशोऽध्यायः**

**।। इति चतुर्थस्कन्धः ।।**

**।। इति श्रीचतुर्थस्कन्धगतप्रमेयसङ्ग्रहः ।।**

**।। श्रीपद्मागोविन्दार्पणमस्तु ।।**

# अथ पञ्चमस्कन्धः

## अथ प्रथमोध्यायः

यर्हि वाव स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवया अञ्जसाऽवगतपरमार्थसत्तत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणः अवनितलपरिपालनाय आम्नातप्रवरगुणगणै-कान्तभाजनतया स्वपित्रोपामन्त्रितो भगवति वासुदेव एव अव्यवधानसमाधियोगेन समावेशितसकलकारकक्रिया-कलापो नैवाभ्यनन्दत् ।। यदपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्माद् सतो यदा पराभवमन्वीक्षमाणः ।। ६ ।।

'ब्रह्मसत्रेण दीक्षिष्यमाण' इत्यत्र ब्रह्मसत्रं सन्न्यासः ।।

ब्रह्मोवाच–

निबोध तातेदमृतं ब्रवीमि
माऽसूयितुं देवमर्हस्यमेयम् ।
अहं भवस्ते तत एष महर्षि-
र्वहाम सर्वे विवशा यस्य दिष्टम् ।। ११ ।।

'माऽसूयितुमर्हसि' इत्यत्र असूया गुणेषु दोषारोपः । तव हिताय मयोपदिष्टे मद्विरक्तिमार्गस्य विघ्नः अभूदिति बुद्धिं मा कुर्वित्यभिप्रायः ।।

ईशावसृष्टं ह्यवरुन्ध्महेऽङ्ग
दुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय यत्तद्यदयुक्तनाथ
चक्षुष्मताऽन्धा इव नीयमानाः ।। १५ ।।

'चक्षुष्मताऽन्धा इव नीयमाना' इत्युक्तिमनुसृत्यैव श्रीमद्वादिराजश्रीमच्चरणैः 'अन्धोऽहं करुणासिन्धो' इत्याद्युक्तम् ।।

**यः षट्सपत्नान् विजिगीषमाणो**
**गृहेषु निर्विश्य यतेत पूर्वम् ।**
**युध्येत दुर्गाश्रित ऊर्जितारीन्**
**क्षीणेषु कामं विचरेद्विपश्चित् ।। १८ ।।**

'यः षट्सपत्नान्' इति श्लोकस्यायमभिप्रायः । यथा दुर्गं निर्माय युध्यन्नापत्काले दुर्गं प्रविश्य स्वक्षेममाचरेदेवं गृहस्थाश्रमी कामपीडनकाले स्वपत्नीरूपं दुर्गमाश्रित्य कामं जयेत् । अन्याश्रमी तु दुर्गं विना युध्यन् यथा शत्रुग्रस्तो म्रियतैवं कामपीडितो भ्रष्टो भवेदिति ।।

**अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम । तस्यामु हवा आत्मजानात्मसमानशीलगुणकर्म-रूपवीर्योदारान् दश भावयाम्बभूव । कन्यां यवीयसीमूर्जस्वतीं नाम ।। २४ ।।**

**दुहितरमूर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानी नाम काव्यसुता ।। ३४ ।।**

**अन्यस्यामपि भार्यायां त्रयः पुत्रा आसन् । उत्तमस्तापसो रैवत इति मन्वन्तराधिपतयः ।। २८ ।।**

प्रियव्रतपुत्रस्य आग्नीध्रस्य पौत्रो भगवान् ऋषभ इति वक्ष्यते । पुत्रस्तापसो भगवान् हरिरेव यो झषग्रस्तं गजेन्द्रममूमुचत् । कन्या चोर्जस्वती देवयानीं सुषुवे यां ययातिरुदूह्य यदुं समजीजनत् । यस्य वंशे भगवान् कृष्णः प्रादुर्बभूव । तथाच प्रियव्रतस्य साक्षात्पुत्रत्वेन नप्तृत्वेन भगवदवतारौ

द्वौ तद्दुहितृवंशे एक इति त्रयः अवताराः प्रियव्रतवंशे ।। अहो भाग्यमस्य महाभागवतस्य स्वोपदष्टरि चतुर्मुखे बहुमानवतः । एवं बहुमानाभावे स्ववंशे भगवदवतारालाभेन महाहानिरभविष्यत् । एतेन ज्ञायते महत्सु बहुमानेन भवितव्यमिति ।।

**यावद् अवभासयति सुरगिरिम् अनुपर्याक्रमन् भगवान् आदित्यो वसुधातलम् अर्धेनैव प्रतपति अर्धेनैव आच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावः तदनभिनन्दन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्याक्रामत् स द्वितीय इव पतङ्गः।।३० ।।**

'अर्धेनैव प्रतपति, अर्धेनैवाच्छायति' इत्यत्र सूर्यरश्मिष्वेव प्रतपन-आच्छादनशक्ती विद्येते । अत एव भूमण्डलार्धस्य प्रतपनमन्यार्धस्याच्छादन-मिति सम्भवति व्यर्थं भूमण्डलस्य गोलत्वकल्पनमिति गुरुपादाः ।।

**या वा इह तद्रथचरणनेमिकृतपरिखास्ताः सप्त सिन्धव आसन् यत एवं कृता सप्त भुवो द्वीपाः ।। ३१ ।।**

'तद्रथचरणनेमिकृतपरिघास्ता सप्तसिन्धव आसन्' इत्यत्र पूर्वं स्वयम्भुवा सृष्टान् स्वायम्भुवपुत्रः स्थूलान् चकारेत्यभिप्रायः ।।

**लवणोदेक्षुरसोद-सुरोद-घृतोद-क्षीरोद-दधिमण्डोद-शुद्धोदनाः सप्त जलधयः सप्तद्वीपपरिखाः अभ्यन्तरद्वीप-समानाः एकैकशो यथा अनुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् पृथक् परित उपकल्पिताः ।।**

**तेषु जम्ब्वादिषु बर्हिष्मतीपतिरनुवृत्तान् आत्मजान् आग्नीध्रेध्मजिह्व-यज्विबाहु-हिरण्यरेतो-घृतपृष्ठ-मेधातिथि-**

**वीतिहोत्रसञ्ज्ञान् यथासङ्ख्यम् एकैकस्मिन् एकमेकमेव अधिपतिं विदधे ।। ३३ ।।**

'क्षीरोदधिमण्डोद' इति श्रुतेऽपि तात्पर्यानुसारेण पञ्चमो दधिमण्डोधिः, षष्ठः क्षीरोदधिरित्यवगन्तव्यम् ।। योजिनमपि तत्रैव प्रदर्शितम् ।।

**स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानु-सेवया अनुपतितगुणविसर्गसंसर्गेण अनिवृत्तमिवात्मानं मन्यमानः आत्तनिर्वेद इदमाह ।। ३६ ।।**

**अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैरविद्या-विरचितविषमविषयान्धकूपे तदलमलं मनुष्यवनिताविनोद-मृगं मां धिग्धिगिति गर्हयाश्चकार ।। ३७ ।।**

'अहो असाध्वनुष्ठितम्' इत्यत्र यद्यपि वस्तुतो महति बहुमानेन ईश्वरेच्छया अधिनिवेशितकर्माधिकारत्वेन च गृहस्थाश्रमस्वीकारेण च न किञ्चिदसाध्वनुष्ठितम् । तथापि स्वात्मानमविरक्तं मन्यमानस्य प्रियव्रतस्य वचनमिदमिति मन्तव्यम् । तथाचोक्तम् 'अनिवृत्तमिवात्मानं मन्यमान आत्तनिर्वेद इदमाह' इति ।।

**परदेवताप्रसादाधिगतात्मप्रत्यवमर्शनपरिनिर्वृत्तोऽनु-वृत्तेभ्यः स्वपुत्रेभ्य इमां गां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव स ह महाविभूतिम् अपहाय स्वयं निहितनिर्वेदो हृदि गृहीतरुचिरहरिविहारानुभावो भगवतो नारदस्य पदवीम् अनुससार ।। ३८ ।।**

'नारदस्य पदवीमनुससार' इति साधु, नतु पदवीं पुनरेवानुससारेति । पूर्वं नारदपदव्याः तुर्याश्रमस्याननुसृतत्वात् ।।

भगवत्प्रसादहेतुभूत-स्वकर्मानुष्ठानरूपयोगोपदेशात् भागवत-प्रियव्रतचरित्रकथनात् भगवतः तापसस्य जन्मनः कीर्तनाच्च भगवन्निष्ठत्वम् ।।

इति श्रीमद्भागवते पञ्चमस्कन्धे प्रथमोऽध्यायः

## अथ द्वितीयोऽध्यायः

**का त्वं चिकीर्षसि च किं मुनिवर्य शैले**
**मायासि किं भगवतः परदेवतायाः ।**
**विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे**
**किं वा मृगान्मृगयसे विपिने प्रमत्तान् ।। ८ ।।**

'का त्वम्' इत्यादिना शृङ्गाररसभरतिवचनेनेदं ज्ञायते व्यासोच्छिष्टं जगत्सर्वम् इति नतु बाणोच्छिष्टमिति प्राञ्चः ।

**सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपविद्यावयः-श्रियौदार्यैः पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बुद्वीपपतिना भौमस्वर्गभोगान् बुभुजे ।।१८ ।।**

'भौमस्वर्गभोगान्' इत्यस्य भूसम्बन्धिस्वर्गाः किम्पुरुषादीनि वर्षाणि तत्रत्यभोगानित्यर्थः । अत एव जम्बूद्वीपपतिनेत्युक्तम् ।।

**आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहनन-बलोपेताः पित्रा विभक्तात्मतुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ।। २१ ।।**

'आग्नीध्रसुताः ... बुभुजुः ' इत्यत्र नाभ्यादयोऽपि नव । वर्षाण्यपि नवेति दाया स्वभावत एव विभक्ता इति ज्ञायते ।

भगवद्भक्तस्य आग्नीध्रस्येहामुत्र फलप्राप्तिकथनात् भगवद्भक्ति-माहात्म्यमेव वर्णितमिति भगवन्निष्ठत्वम् ।।।

भगवद्भक्तस्य जम्बूद्वीपाधिपतेराग्नीध्रस्य चतुर्मुखप्रेषितसुर-वनितया सङ्गमस्य वर्णनेन भगवद्भक्त्या अपेक्षितसर्वपुरुषार्थप्राप्ति-रिति सूचनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे द्वितीयोऽध्यायः**

## अथ तृतीयोऽध्यायः

ऋत्विक्स्तोत्रव्याजेन भगवन्महिमावर्णनात् भगवत ऋषभस्य अवतारवर्णनाच्च भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे तृतीयोध्यायः**

## अथ चतुर्थोऽध्यायः

**यस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवान् ऋषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्ष-माजनाभं नामाभ्यवर्षीत् ।। ३ ।।**

'यस्य हीन्द्रः स्पर्धमानो भगवान्' इत्यत्र भगवानिति विशेषणेन तन्मन्वन्तरे यज्ञरूपी विष्णुरेवेन्द्र इति ज्ञायते । अतः स्पर्धमान इवेति व्याख्यातव्यम् । स्वेन सह स्वस्य स्पर्धायोगात् । भगवतः स्पर्धाख्यदोषाभावाच्च ।।

**कविर्हरिरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।**
**आविर्होत्रोऽथद्रुमिलश्चमसः करभाजनः ।।**

**इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेव-नारदसंवादरूपं उपशमायमान-मुपरिष्टाद्वर्णयिष्यामः ।। १० ।।**

कविरिति श्लोके पक्वयोगिनां नामसङ्कीर्तनमपि भगवत्तोषायेति भावेन नवपक्वयोगिनां नामसङ्ग्रहणम् ।।

**भगवत ऋषभस्य कथावर्णनात् स्पष्टं भगवन्निष्ठत्वम् ।।**

एवमुत्तराध्यायद्वयोरपि ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे चतुर्थोऽध्यायः**

## अथ पञ्चमोऽध्यायः

सारभूतस्य भगवदुपदेशस्य वर्णनमत्राध्याये ।।

**महत्सेवां द्वारमाहुर्विमुक्ते-**
**स्तमोद्वारं योषितां सङ्गिसङ्गम् ।**
**महान्तस्ते समचित्ताः प्रशान्ता**
**विमन्यवः सुहृदः साधवो ये ।। २ ।।**

'तमोद्वारं योषितां सङ्गिसङ्गम्' इत्यत्रायमभिप्रायः । भगवत्पादोक्तरीत्या योषित् अन्यथाबुद्धिः । तथाच अन्यथाज्ञानिसङ्गस्तमोद्वारमित्यर्थः । योषिच्छब्देन नारी च ग्राह्या । तर्हि योषित्सङ्गिसङ्गस्य तमोद्वारत्वं कथमिति चेत्- नीचदैत्यनारीसङ्गे तमःप्राप्तिः । नहि देहार्ध तमो गच्छति, अन्यार्धं सुगतिं प्राप्नोतीति युज्यते । एवं ऋषिदेवतास्त्रीणां कामोऽपि तमःप्राप्तिद्वारमेव । यथोक्तं भगवत्पादैरेकादशतात्पर्ये 'महतां वनिताकामः' इत्यादिना ।।

'महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः' इत्यत्र समे मया लक्ष्म्या समेते वा 'निर्दोषं हि समं ब्रह्म' इति गीतोक्तेः निर्दोषे वा नारायणे चित्तं येषां ते समचित्ताः । तर्हि 'प्रशान्ता' इत्यनेन गतार्थत्वं शान्तेत्यस्य भगवन्निष्ठावाचकत्वादिति नाशङ्कनीयम् । प्रशान्ता इत्यस्य प्रकर्षेण शान्त-स्वभावा इत्यर्थस्वीकारात् । तर्हि विमन्यव इत्यनेन गतार्थता, मन्युशब्दस्य

क्रोधपर्ययत्वात् । विगतक्रोधो हि शान्त इति न मन्तव्यम् । मन्युशब्दस्य ज्ञानार्थकत्वाङ्गीकारात् , वीत्यस्य विशेषेत्यर्थस्वीकाराच्च ।।

**ये वा मयीशे कृतसौहृदार्था**
**जनेषु देहं भरवार्तिकेषु ।**
**गृहेषु जायात्मजरातिरासु**
**न प्रीतियुक्ता यावदर्थाश्च लोके ।। ३ ।।**

'गृहेषु जायात्मजरातिरासु न प्रीतियुक्ता' इत्यत्र यावद्विहितं ततः अधिकप्रीतियुक्ता नेत्यर्थः । सर्वथा प्रीत्यभावे गृहस्थधर्मानुष्ठानासिद्धेः । अत एव 'यावदर्थाश्च' इत्युक्तम् ।

**गुरुर्न सः स्यात्स्वजनो न सः स्यात्**
**पिता न सः स्याज्जननी न सा स्यात् ।**
**दैवं न तत्स्यान्नृपतिश्च सः स्यात्**
**न मोचयेद्यः समुपेतमृत्युम् ।। १८ ।।**

'दैवं न स स्यात्' इत्यत्र यदि यत् किञ्चित् दैवं वैषयिकफलं प्रदाय स्वाराधकं विषयगर्ते पतितं कुर्यात् तद्दैवं नेत्यभिप्रायः ।।

**तस्माद्भवन्तो हृदयेन जाताः**
**सर्वे महीयांसममुं सुनाभम् ।**
**अक्लिष्टबुद्ध्या भरतं भजध्वं**
**शुश्रूषणं तद्भरणं प्रजानाम् ।। २० ।।**

**भूतेषु वीरुद्भ्य उदुत्तमा ये**
**सरीसृपास्तेषु सुबोधनिष्ठाः ।**

ततो मनुष्याः प्रवरास्ततोऽपि
गन्धर्वसिद्धा विबुधानुगा ये ।। २१ ।।

देवा सुरेभ्यो मघवान् प्रधानो
दक्षादयो ब्रह्मसुताश्च तेषाम् ।
भवः परः सोथ विरिञ्चिवीर्यः
स मत्परोहं द्विजदेवदेवः ।। २२ ।।

'भरतं भजध्वम्' इत्यत्र भरतो वायुः । 'भरतो वायुरुद्दिष्टः भारती तत्सरस्वती' इत्युक्तेः । अवश्यमेतदेवम् । भरतं भजध्वमित्युक्त्वा 'भूतेषु वीरुद्भ्यः' इत्यादिना भरतमततारतम्योपदेशात् ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे पञ्चमोऽध्यायः**

## अथ षष्ठोऽध्यायः

राजोवाच–

न नूनं भगवन्नात्मरामाणां योगसमीरितज्ञानावभर्जित-कर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि ।। १ ।।

शुक उवाच–

सत्यमुक्तं किन्त्विह वा एके मनसो विस्रम्भमनवस्थानस्य घटकिराट इव न सङ्गच्छन्ति ।। २ ।।

तथा चोक्तम्–

न कुर्यात्कस्यचित् सख्यं मनसि ह्यनवस्थिते ।
यद्विस्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ।। ३ ।।

**नित्यं ददाति कामस्य छिद्रं तमनु येऽरयः ।**
**योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ।। ४ ।।**

**कामो मन्युर्मदो लोभः शोकमोहभयादयः ।**
**कर्मबन्धश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ।। ५ ।।**

राज-ऋषिसंवादेनेदमवसीयते । योगिनो यदृच्छया प्राप्तैश्वर्याण्यपि नाभिनन्देयुरिति । अतो ये ऐश्वर्याभासान्येव प्रदर्शयन्ति ते योग्याभासा उदरम्भरणनिरता इति ज्ञेयम् ।।

**एकदा तु काङ्कटककर्णाटकाद्दक्षिणकर्णाटकान् देशान् यदृच्छयोपगतः कुटचाचलोपवने आस्यकृताश्मकवल उन्माद इव मुक्तमूर्द्धजोऽसंवीत एव विचचार ।। ८ ।।**

कुटजाचलस्य कोडचाद्री इति अपभ्रष्टसंज्ञा ।।

**यस्य किलानुचरितमुपाकर्ण्य काङ्कटकर्णाटकानां दक्षिण-कर्णाटकानां राजार्हतनामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथं पाषण्डमसमञ्जसं निजमनीषया मन्दः सम्प्रवर्त्तयिष्यते ।।**

आर्हताः ऋषभः प्रथमस्तीर्थङ्करः द्वितीयः अर्हत इति वदन्तीति प्रसिद्धम् ।।

**अहो भुवः सप्तसमुद्रवत्या**
**द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।**
**गायन्ति यत्रत्यजना मुरारेः**
**कर्माणि भद्राण्यवतारवन्ति ।। १४ ।।**

'द्वीपेषु वर्षेष्वधिपुण्यमेतत्' इत्यत्र सप्तद्वीपेषु तत्रापि जम्बूद्वीपे नववर्षसु

मध्ये भारतवर्षमाधिपुण्यमित्यर्थः । अधिपुण्यमित्येन भारतवर्षमधिकपुण्यफलदम् । अन्यान्यल्पपुण्यप्रदानीत्येके ।। तन्न बुध्यामहे । इतरद्वीपवर्षनिवासिनामार्ष्टिषेणादीनामधिकपुण्यस्यैव दर्शनात् । ये वर्षभोगानन्तरं शिष्टपुण्येनेतरद्वीपेषु वर्षेषु वा जन्म लब्धवन्तस्तेषां शिष्टपुण्यक्षयार्थमेव भोगार्थं तत्र जन्मवत्वात् तदपेक्षया भारतवर्षमधिपुण्यं पुण्यमधिकृत्य वर्तमानमिति युज्यते ।।

अनेन श्लोकेनेदानीं निषिद्धानां विदेशानामल्पपुण्यसाधकत्वं तु नितरां न सङ्गच्छते । तेषां भारतवर्षैकदेशत्वेऽपि सगरेण बहिष्कृतत्वात् वसिष्ठेनानुमोदितत्वाच्च । व्यक्तमेतद्धरिवंशे विष्णुपुराणे च ।।

**राजन्पतिर्गुरुरलं भवतां यदूनां**
**देवप्रियः कुलपतिः क्व च किङ्करो वः ।**
**अस्त्वेवमङ्ग भगवान् भजतां मुकुन्दो**
**मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ।।**

'मुक्तिं ददाति न कर्हिचित् स्म न भक्तियोगम्' इत्यत्र पूर्णां भक्तिमित्यर्थः । विना ब्रह्माणमित्युपस्कर्तव्यम् ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे षष्ठोऽध्यायः**

## अथ सप्तमोऽध्यायः

**भगवद्भक्तभरतोपाख्यानकथनव्याजेन विजातीयमृगेऽपि निरभिमानत्वरूपं वैराग्यमपेक्षितं भक्तिदार्ढ्यायेति बोधनात् एतदध्यायद्वयस्य भगवन्निष्ठता ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे सप्तमोऽध्यायः**

## अथ अष्टमोऽध्यायः

**श्रीशुक उवाच–**

**एकदा तु महानद्यां कृताभिषेकनैगमिकावश्यको ब्रह्माक्षरम् अभिगृणानो मुहूर्तत्रयमुदकान्त उपविवेश । तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम । तया पेपीयमाने उदके तावदेवाविदूरेण नदतो मृगपतेरुरुनादो लोकत्रयभयङ्कर उदपतत् ।। १ ।।**

‘ब्रह्माक्षरम्’ इत्यस्य प्रणव इत्यर्थः प्रतीयते । यतीनामेव प्रणवाधिकारात् विजयध्वजतीर्थैः ब्रह्म अक्षरमिति विच्छिद्य व्याख्यातमित्यवगन्तव्यम् ।।

अनाथमृगाहरणपोषणादिना भरतस्य कथं दोष आपतित इति सम्यक् न ज्ञायते । अत्र गुरुपादाः ‘एणकुणकस्य तावदेव पोषणं कार्यमासीत् यावता स्वयं समर्थो भवति । तदनन्तरमपि मयैव पोषितव्य एष इत्यभिमानकरणात् दोष आपतित इति ।।

**तदानीमपि पार्श्ववर्तिनमात्मजं बन्धुमिवानुशोचन्तम् अभिवीक्षमाणो मृग एवाभिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरम् अनुस्मृतजन्मानुस्मृतिरितरवत् मृग-शरीरमवाप ।। २४ ।।**

तदानीमपि पार्श्ववर्तिनमित्यनेनेदं ज्ञायते । केचित् मृगो नष्टः । तच्चिन्तया देहं त्यक्त्वा मृगः अभवदिति सङ्गिरन्ते यत्तदसाधु इति ।।

**एवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रम् उपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालंजरात् प्रत्याजगाम ।। २७ ।।**

'पुलस्त्यपुलहाश्रमं ....प्रत्याजगाम' इत्यत्र मृगजन्मस्थानात् कालञ्जर-पर्वतात् स्वपूर्वजन्मनि यत्र स्थितस्तमाश्रमं प्रत्याजगामेत्यर्थः ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे अष्टमोऽध्यायः**

## अथ नवमोऽध्यायः

**यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतम् उत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ।। २ ।।**

'चरमशरीरेण विप्रत्वं गतम्' इत्यस्य यद्विप्रशरीरं प्राप्तं तच्चरममित्यर्थः । नतु चरममिदं शरीरं भूयादित्यनुसन्धाय प्राप्तम् ।।

**तस्यापि ह वा आत्मजस्य स विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात् संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन् कर्मनियमाननभिप्रेतानपि समशिक्षयत् अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेत्यसदाग्रहः ।। ४ ।।**

'अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेत्यसदाग्रह' इत्यत्र पितुः पुत्रानुशासनाग्रहः असन् इति नार्थः । किन्तु भरतस्यापरोक्षज्ञानित्वेन तद्विषये मया अनुशिष्टेनानेन भाव्यमित्येषः असदाग्रह इत्यवगन्तव्यम् ।।

**यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति । किन्तु न समं विषमं न्यूनमधिकमिति वेद । कणपिण्याकफलीकरणकुल्माष-स्थालीपुरीषादीन्यप्यमृतवदारोचयति ।। ११ ।।**

'न्यूनमधिकमिति न वेद' इत्यस्यायमर्थः । न्यूनमिति चिन्तने तदाहरणाय पुनर्जन्मापेक्षितं स्यात् । अधिकमिति चिन्तने तद्दानार्थम् । अतो यदृच्छयाप्तेन

सन्तुष्टो बभूवेति ।।

इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमद-रजसोत्सिक्तमनसां भगवत्कलाङ्गिरसकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं यद् ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यनभि-मतस्य आलम्भनं तदुपलभ्य ब्रह्मतेजसा अतिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाल सैव देवी भद्रकाली।।१७ ।।

भृशम् अमर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिल-दंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं सहाट्टहासम् अतिसंरम्भेण विमुञ्चती तत उत्पत्त्य पापीयसां दुर्भावानां तेनैवासिना वृक्णशीर्ष्णां गलात्स्रवन्तम् असृगासवम् अत्युष्णं सह गणैर्निपीय अतिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त विजहार च शिरःकन्दुकलीलया ।।१८।।

‘भद्रकाली नेयं सात्विकी शिवपत्नी किन्तु तामसी क्षुद्रदेवता । रक्तपानादिदमवसीयते ।।

भगवद्भक्तभरतचरितवर्णनेन भगवता तद्रक्षणवर्णनेन च भगवन्निष्ठत्वम् ।।

इति श्रीमद्भागवते पञ्चमस्कन्धे नवमोऽध्यायः

## अथ दशमोऽध्यायः

श्रीशुक उवाच–

अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे नद्या भगवन्तं कपिलऋषिं द्रष्टुं कस्मिंश्चिदाश्रमे स्थितं तत्कुलपतिना

**शिबिकावाहकपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्धः एष पीवा युवा संहननाङ्गः खरवत् धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभम् अतदर्ह उवाह शिबिकां स हि महानुभावः ।। यदा हि द्विजवरस्य युगमात्रावलोकानुगतेर्न समा पुरुषगतिस्तदा विषमगतायां स्वशिबिकायां रहूगण उपधार्य पुरुषानधिवहत आह । हे वोढारः साध्वतिक्रमत किमिति विषममूह्यते यानमिति ।। १ ।।**

'युगमात्रावलोकनानुगतेः' इत्यत्र पिपीलिकाद्यल्पजातिप्राणिहिंसा-परिहारार्थं युगमात्रप्रदेशमवलोक्य गच्छतो भरतस्य गतिरन्येषां गत्या समा न बभूवेत्यर्थः । युग इत्यस्य पादविक्षेपद्वयमित्यर्थः । तदानीं चातुर्मास्यमासीदतो विशेषतः पिपीलिकादिहिंसानिवारणपर आसीदित्याचक्षते । अथवा दूरदर्शने यत्किञ्चिददृश्यदर्शनं स्यादिति भयेन युगमात्रावलोकनमिति ज्ञेयम् ।।

**राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसञ्जातवेदसमिव रजसा तमसा आवृतमतिराह ।। अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक एव ऊहितवान् सुचिरं नातिपीवा नाति-संहननाङ्गो जरसोपद्रुतो भवान्सखे नो एवापर एते सङ्घट्टिनः ।।**

'अहो कष्टम्' इत्यत्र वस्तुत इदानीमेवागतं प्रति उरु परिश्रान्तो दीर्घमध्वानमेक एवोहितवान् इति व्यङ्ग्योक्तिः, वस्तुतः पीवानं संहननाङ्गं प्रति नातिपीवेत्यादि वस्तुतो युवानं प्रति जरसोपद्रुत इतीति विवेकः ।।

**अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः किमरे त्वं जीवन्मृतोसि मां कदर्थीकृत्य भर्तृशासन-**

**मतिचरसि । प्रमत्तस्य ते करोमि चिकित्सां दण्डपाणिरिव जनतायाः यथा प्रकृतिं स्वां भजिष्यसीति ।। ८ ।।**

'प्रकृतिं भजिष्यसि' इत्यस्य मृतो भविष्यसीत्यर्थः ।।

**स्थौल्यं कार्श्यं व्याधय आधयश्च**
**क्षुत्तृड्भयं कलिरिच्छा जरा च ।**
**निद्राऽरतिर्मन्युरहंमदश्च देहेन**
**जातस्य हि मे न सन्ति ।। ११ ।।**

'देहेन जातस्य हि मे न सन्ति' इत्यस्य स्थौल्यादीनि देहाभिमानिनो वर्तन्ते नतु देहाभिमानरहितस्य म इत्यर्थः ।।

**न विक्रिया विश्वसुहृत्सखस्य**
**साम्येन वीताभिमतेस्तवापि ।**
**महद्विमानात् स्वकृताद्धिमादृग्**
**धक्षत्यदूरादपि शूलपाणिः ।। २६ ।।**

'धक्ष्यत्यदूरादपि शूलपाणिः' इत्यत्र न किञ्चिदतिशयोक्तिः । 'स्वतो महदवज्ञानाद् रुद्रोप्यात्मानमादहेत्' इति वचनात् ।।

**भरतरहूगणसंवादव्याजेन संसारहेतुरहंममता । सा त्याज्येति बोधनात् तत्त्यागेन भगवद्भक्तिदार्ढ्यमिति भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे दशमोऽध्यायः**

## अथ एकादशोऽध्यायः

**न तस्य तत्त्वग्रहणाय साक्षाद्**
**वरीयसीरपि वाचः समासन् ।**

**स्वप्ने निरुक्त्या गृहमेधसौख्यं**
**न यस्य हेयानुमितं स्वयं स्यात् ।। ३ ।।**

'न यस्य हेयानुमितं स्वयं स्यात् ' इत्यत्र स्वयं वैराग्यं देवतानाम्, अन्येषां दुःखं दृष्ट्वा वैराग्यमृषीणाम् ,स्वयं दुःखदर्शनेन वैराग्यं मनुष्याणामिति विवेक इति गुरुपादाः । 'विविधदुःखदर्शनेन विरक्तस्य' इति अन्त्ययोर्द्वयोर्ग्रहणमिति च ।।

**वैराग्यनिशिततत्वज्ञानेनाहङ्कारनिरसनद्वारा संसारनिवृत्तेरुपन्यासात् सर्वसात्विकराजसतामसव्यापाराणां भगवदधीनतावर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे एकादशोऽध्यायः**

## अथ द्वादशोऽध्यायः

**सर्वस्य भगवदधीनत्वस्य भगवतः सर्वाधारत्वस्य वर्णनात् विजीतीयएणकुणके स्नेहादप्यनर्थप्राप्तिरिति सर्वतः असङ्गं शिक्षेदिति भगवज्ज्ञानसाधनभक्तिदार्ढ्यहेतुवैराग्योपन्यासाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे द्वादशोऽध्यायः**

## अथ त्रयोदशोऽध्यायः

**भवाटवीवर्णनव्याजेन पुनर्वैराग्योपदेशात् भगवदाश्रितानुभववर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे त्रयोदशोऽध्यायः**

## अथ चतुर्दशोऽध्यायः

**यदा तु ताभिः पाषण्डदेवताभिः आत्मवञ्चकैरुरु-**

**वंचितो ब्रह्मकुलं समाविशंस्तेषां शीलमुपनयनादिश्रौतस्मार्त-कर्मानुष्ठानेन भगवतो यज्ञपुरुषस्याराधनमेव पुनस्तदरोच-यंच्छूद्रकुलं भजत्यनिगमपरिशुद्धं यस्य हि मिथुनीभावः कुटुम्बभरणं यथा वानरजातेस्तत्रापि निरवरोधः स्वैरेण विहरन् अतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिग्राम्यकर्मणैव विस्मृतकालावधिः ।। ३३ ।।**

'पाखण्डदेवताभिरात्मवञ्चकैः' इत्यत्र किञ्चित्क्षुद्रफललाभेन तस्यामेव श्रद्धाजननरूपवञ्चनमिति ध्येयम् ।। पूर्वोक्तकारणादेव भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे चतुर्दशोऽध्यायः**

## अथ पञ्चदशोऽध्यायः

**श्रीशुक उवाच–**

**भरतस्यात्मजः सुमतिर्नामाऽभिहितो यमु ह वाव केचित्पाषण्डिनो विलोक्य ऋषभपदवीमनुवर्तमानमनार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयसीं कलौ कल्पयिष्यन्ति ।। १ ।।**

'कलौ कल्पयिष्यन्ति' इत्यत्र ऋषभचरितमनुवर्तमानं सुमतिं दृष्ट्वा अर्हतादयो जैनमतं प्रवर्तयिष्यन्तीत्यर्थः । तथैव षष्ठाध्याय उक्तत्वात् तत्तात्पर्यानुगुण्याच्च । इदानीं प्रचलिते विजयध्वजीये पाठे बौद्धमतं प्रवर्तयिष्यन्तीति दृश्यते । नूनं स पाठः प्रक्षिप्त इति मन्यामहे ।।

**गयं नृपं कः प्रतियाति कर्मभि-**
**र्यज्वाभिमानी बहुविद्धर्मगोप्ता ।।**

**सदागतश्रीः सदसस्पतिः सतां**
**सत्सेवकोऽन्यो भगवत्कलामृते ।। ७ ।।**

'गयं नृपम्' इत्यत्र गयः कर्मजदेवता ।'गयश्च भरतश्चैव कर्मदेवसमौ मतौ' इति भगवत्पादोक्तेः । अयं गयासुरादत्यन्तभिन्न एवेत्यवगन्तव्यम् । केषाञ्चित् प्रश्नपरिहारार्थमयमंशः अत्र निवेशितः ।।

**अत्राध्याये नवमे बहुष्वध्यायेषु च केवलं वंशवर्णनं दृश्यते । कथमस्य भागवतशास्त्रे निवेशनमिति न संशयितव्यम् । भगवद्भक्तानां राजर्षीणां नामसङ्कीर्तनादेव पापपरिहारात् । अत एव भगवन्निष्ठत्वं च ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे पञ्चदशोऽध्यायः**

## अथ षोडशोऽध्यायः

**ऋषिरुवाच–**

**न वै महाराज भगवतो मायागुणविभूतेः स्थानविशेषाणां नामरूपतः काष्ठां मनसाऽधिगन्तुमलं विबुधायुषेणापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ।। ४ ।।**

'भूगोलविशेषम्' इत्यत्र भूमिर्न गोलाकारः । सप्तद्वीपवत्या भूमेः 69900000योजनविस्तीर्णत्वात् । भूकन्दस्य पञ्चसहस्रयोजनपरिमितत्वात् । अतः भूशब्देन ब्रह्माण्डं ग्राह्यम् । तच्च गोलाकारमिति गुरुपादाः ।।

**यस्मिन्नववर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादा-गिरिभिः सुविभक्तानि भवन्ति ।। ६ ।।**

'यस्मिन्नववर्षाणि नवयोजनसहस्त्रयामानि ' इत्यत्र भारत-किम्पुरुष-हरिवर्ष-रम्यक-हिरण्मय-कुरुवर्षाणां प्रत्येकं नवयोजनसहस्त्रायामत्वेऽपि कथमिलावृत-भद्राश्व-केतुमानां तावत्वम् । इलावृतस्य चतुस्त्रिंशत्सहस्त्र योजनायामत्वात्, इतरयोरेकैकत्रिंशयोजनानामत्वादिति नाशङ्कनीयम् । केतुमाले पवन-पारियात्रौ भद्राश्वे जठर-देवकूटौ च पर्वतौ द्विसहस्त्रायामौ उदगायतौ वर्तेते । तथाच पर्वतद्वयायामं चतुःसहस्त्रयोजनं विहाय सप्तविंशत्सहस्त्रयोजनायामौ भवतः । पर्वतद्वयकृतत्रिभागाः प्रत्येकं नवसहस्त्रयामा भवन्ति । इलावृतमध्ये मेरोः परिणाहः षोडशसाहस्त्रयामपरिमितः । तं विहाय परितः नवयोजनसहस्त्रपरिमितो देशः शिष्ट इति एतच्च विवरणं भूगोलवर्णनानुसारेण ।।

**भगवतः स्थूलरूपवर्णनेन भगवन्निष्ठत्वम् । एवमुत्तरत्रापि ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे षोडशोऽध्यायः**

## अथ सप्तदशोऽध्यायः

**श्रीशुक उवाच–**

**तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेण अन्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिता अखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदी इत्यनुपलक्षितवचोभिः अभिधीयमाना अतिमहता कालेन युगसहस्त्रोपलक्षणेन दिवो मूर्धन्यवततार यत्तद्विष्णुपदमाहुः ।।१।।**

'वामपादाङ्गुष्टनखनिर्भिन्न' इत्यत्र भगवान् वाराहे वामपादं तदन्यत्र दक्षिणपादमुज्जहारेति मन्तव्यम् ।। दिवो मूर्धनि ध्रुवलोके ।।

**यत्र हवा व वीरव्रत औत्तानपादिः परमभागवतः अस्मत्-कुलदेवताचरणारविन्दो-दकमिति यामनुसवनमुत्कृष्यमाण-भगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्याद् विवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलया भिव्यज्यमानरोमपुलककुलक अधुनापि परमादरेण शिरसा बिभर्ति ।। २ ।।**

**तत ऋषयस्तत्प्रभावज्ञा ऋषिलोके इयं ननु तपस आत्यन्तिकी सिद्धिरेतावतीति भगवति सर्वात्मनि वासुदेवे अनवरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्ति-मिवागतां मुमुक्षवः सबहुमानमेवाद्यापि जटाजूटैरुद्वहन्ति ।।**

'अधुनापि' 'अद्यापि' इति वचनात् देवगङ्गा तत्रेदानीमपि प्रवहतीति ज्ञायते । भूलोके तु प्रवहनं प्रत्यक्षम् । एवमेव पातालेऽपि ज्ञेयम् । अत एव त्रिपथगामिनी इति नाम ।।

**तथैवालकनन्दा दक्षिणेन तु ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य निषध-हेमकूट-हिमकूटानि अतिरभस-तररंहसा लुठन्ती भारतमेव वर्षं दक्षिणस्यां दिशि जलनिधिं प्रविशति ।। ९ ।।**

'तथैवालकनन्दा' इत्यत्र स्वर्धुन्या यो भागः हिमवन्तं प्राप्तः सा अलकनन्दा । भागीरथीसङ्गमात् प्राक् तथैवाभिधीयमाना । देवप्रयागात् परतः गङ्गेति नामेत्यवगन्तव्यम् ।।

**अत्रापि जम्बूद्वीपे भारतमेव वर्षं कर्मक्षेत्रम् । अथान्यानि अष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि**

**स्वर्गपदानि व्यपदिशन्ति ।। १० ।।**

**येषु पुरुषाणामयुत-वर्षायुषां देवकल्पानां नागायुत-प्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतनिरत-नरवरावरोधमिथुनव्यवाया-पवर्गधृतैकगर्भकलत्राणां त्रेतायुग-समः कालो वर्तते ।। ११ ।।**

'अन्यान्यष्टवर्षाणि स्वर्गिणां ...येषु पुरुषाणाम्' इत्यादिनेदं ज्ञायते । न केवलं भारतदेश एव भरतवर्षम्, किन्तु परिदृश्यमानभूखण्डं सर्वस्वं भारतवर्षमिति । इह कुत्रापि अयुतवर्षायुष्ट्वादेरनुपलम्भात् ।।

**भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवत-श्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसंज्ञां आत्मसमाधिरूपेण सन्निधायैतदभिगृणन् भव उपधावति ।। १५ ।।**

'तुरीयां मूर्तिम्' इत्यस्य चतुर्थीमिति नार्थः । तथात्वे अनिरुद्धसंज्ञास्यात् । नतु सङ्कर्षणसंज्ञा । अतः चतुर्व्यूहे एकांशभूतामित्यर्थः ।।

**भव उवाच–**

**ॐ नमो भगवते महापुरुषाय सर्वगुणसङ्ख्याताय अनन्तायाव्यक्ताय नम इति ।।१६।।**

'ओं नमो भगवते' इत्यादि । रुद्रः शेषपदमाप्तुं शेषान्तर्गतं सङ्कर्षमुपास्ते इत्यवगन्तव्यम् ।।

**विष्णुपदीवर्णनात् सङ्कर्षणवर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे सप्तदशोऽध्यायः**

## अथ अष्टादशोऽध्यायः

**केतुमाले भगवान्कामदेवस्वरूपेणास्ते लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां च तद्वर्षपतीनां पुरुषायुषाऽहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते निपतन्ति ।।**
**१५ ।। अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किञ्चिदुत्तंभितसुन्दरभ्रूमण्डलसुभगवदनारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ।। १६ ।।**

**तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा-देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताहस्सु तद्भर्तृभिरुपेतोपास्ते । इदं चोदाहरति ।। १७ ।।**

'केतुमाले भगवान्..उपास्ते' इत्यत्र रतिः प्रद्युम्नप्रतिमास्थानीयकामदेवमुपास्ते । रत्यन्तर्गता रमा कामान्तर्गतं प्रद्युम्नमुपास्ते इति विवेकः ।।

**हयग्रीव-प्रद्युम्न-मत्स्य-कूर्म-वराहोपासनवर्णनात् भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे अष्टादशोऽध्यायः**

## अथ एकोनविंशोऽध्यायः

**न वै स आत्माऽऽत्मवतामधीश्वरो**
**भुङ्क्ते हि दुःखं भगवान्वासुदेवः ।**
**न स्त्रीकृतं कश्मलमश्नुवीत**
**न लक्ष्मणं चापि जहाति कर्हिचित् ।। ६ ।।**

'न लक्ष्मणं चापि' इत्यत्र दुर्वासआगमनसमये द्वारि स्थितं लक्ष्मणं न जहातीत्यर्थः ।

**चन्द्रवटा ताम्रपर्णी अवटोदका कृतमाला वैहायसी कावेरी वेणी पयोदा यमुना सरस्वती शर्करावर्ता तुङ्गभद्रा कृष्णा भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी सुरसा नर्मदा चर्मण्वती सिंधुः अन्धः शोणश्च महानदौ वेदस्मृतिः ऋषिकुल्या त्रिसोमा कौशिकी मन्दाकिनी दृषद्वती गोमती सरयू ओघवती सप्तवती घोषणा सुषोमा शतमाला चन्द्रभागा शुतद्रु मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ।। १८ ।।**

मरुद्वृधा कावेरी ।।

**कल्पायुषां स्थानजयात्पुनर्भवात्**
**क्षणायुषां भारतभूजयो वरः ।**
**क्षणेन मर्त्येन कृतं मनस्विनः**
**संन्यस्य संयांत्यभयं पदं हरेः ।। २३ ।।**

'कल्पायुषाम्' इत्यत्र महर्लोके दिनकल्पावध्यायुष्मतामित्यर्थः । महर्लोके ये उत्तमा नराः तेषामिहागमनं नास्तीति मन्तव्यम् ।। अथवा कल्पायुषां स्वर्गलोके मन्वन्तरावध्यायुषामित्यर्थः ।।

**किं दुष्करैर्नः क्रतुभिस्तपोव्रतै-**
**र्दानादिभिर्वा द्युजयेन फल्गुना ।**
**न यत्र नारायणपादपङ्कजस्मृतिः**
**प्रमुष्टाऽतिशयेन्द्रियोत्सवात् ।। २२ ।।**
**न यत्र वैकुण्ठकथासुधाऽपगा**
**न साधवो भागवतास्तदाऽऽश्रयाः ।**
**न यत्र यज्ञेशमखा महोत्सवाः**
**सुरेशलोकोऽपि न याति सेव्यताम् ।। २४ ।।**

'न यत्र' इत्यत्रेदमवगन्तव्यम् । यद्यपि देवलोकेऽपि देवर्षिमुखात् वैकुण्ठकथामृतापगा प्रवहति हरिश्चन्द्रादयो महाभागवता वर्तन्ते देवकृतयज्ञादयोऽपि प्रवर्तन्ते । तथापि काम्यकर्म कृत्वा तत्र कृतानां भोग एवासक्तेस्तेषामेते दुर्लभा इत्यर्थः । अत एव 'स्मृतिः प्रमृष्टा अतिशयेन्द्रियोत्सवात्' इति पूर्वमुक्तम् ।।

**यैः श्रद्धया बर्हिषि भागशो हवि-**
**र्निरुप्तमिष्टं विधिमन्त्रवस्तुतः ।**
**एकः पृथङ् नामभिराहुतो मुदा**
**गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ।। २८ ।।**

'एकः पृथङ्नामभिः ' इत्यत्र इन्द्रादिनामभिस्तत्तद्देवताह्वानेपि इन्द्रादिशब्दमुख्यवाच्यहरिरेवाहुत इत्यर्थः ।।

**श्रीशुक उवाच–**

**जम्बुद्वीपस्य च राजन्नुपद्वीपान् अष्टौ ह्येक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पिताः ।। २९ ।। तद्यथा स्वर्णप्रस्थश्चन्द्र शुक्र आवर्तनो रमणको मन्दोरुणः पाञ्चजन्यः सिंहलो लङ्केति ।। ३० ।।**

सिंहलो लङ्केति पृथङ् निर्देशात् ज्ञायते लङ्का सिंहलाद्भिन्नेति । एतेन सिंहलं लङ्कामिति मन्वाना भ्रान्ता इत्यवधेयम् ।।

**श्रीराम-नर-नारायणोपासनवर्णनात् भारतवर्षमहिमावर्णनव्याजेन भगवद्भक्तिसाधनदेशवर्णनाच्च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे एकोनविंशोऽध्यायः**

## अथ विंशोऽध्यायः

**एवमेव दधिमण्डोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकसमुद्रेण बहिरावृतो यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितं तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनयोर्वर्षयोर्मर्यादाचला- युतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनां यदुपरिष्टात्सूर्यरथस्य मेरुं परिक्रमतः संवत्सरात्मकमहोरात्राभ्यां चक्रं परिभ्रमति ।। ३० ।।**

'यदुपरिष्ठात् मेरुं चक्रमणतः संवत्सरात्मकं चक्रम्' इत्यत्रेदमवगन्तव्यम् ।।

चक्रं मानसोत्तरमुपरि चङ्क्रमति । रथस्तु चक्रं दक्षिणतो वर्तते । रथमेकस्मिन् दिने 7,14,280000 + 5 5/7 शतयोजनानि सञ्चरति । रथस्तु तत्त्रिभागाधिकम् । नाम 2,38,090000 +5 5/21 शतयोजनानि । मिलित्वा सूर्यरथचक्रसञ्चारमार्गस्य विस्तारः 9,52,37000+ 10 10/21शतयोजनानि ।। अत्र भुज्युब्राह्मणभाष्यं प्रमाणम् ।।

स्वात्मजौ रमण-घातकिनामानौ इत्यत्रेदं मन्तव्यम् । प्लक्षादिपञ्चद्वीपेषु सप्तसप्त पर्वता वर्षाश्च । तत्रत्यप्रैयव्रतानां सप्त सप्त पुत्राः । पुष्करद्वीपे मर्यादापर्वत एक एव । द्वे वर्षे । तत्रत्य प्रैयव्रतस्य द्वावेव पुत्रौ । अतो दाय-विभागार्थं दायादैर्न प्रयतितव्यम् । स्वयं भगवता विभागस्य कृतत्वादिति ।।

**एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः स तु पञ्चाशत्कोटिगुणितभूगोलकस्य तुरीयभागो**

**यावाँल्लोकालोकाचलः ।। ३८ ।।**

'भूगोलस्य तुरीयभागो यावान् लोकालोकाचल' इत्यत्र प्रचलिते विजयध्वजीये 'तुरीयभागः चतुर्थोऽशः सार्धद्वादशकोटियोजन' इति वर्तते । एतदसाधु । लोकाद् द्विगुणं तमः, तद्द्विगुणम् अन्धन्तम इति स्फुटत्वेन ।।

तर्हि तमः पञ्चविंशत्कोटियोजनविस्तृतम् अन्धन्तमः पञ्चाशत्कोटियोजन-विस्तृतमिति स्यात् । हन्त तर्हि कथं ब्रह्माण्डान्तर्वर्तिनःप्रदेशस्य पञ्चाशत्कोटि-योजनविस्तारः स्यात् । अत इदं नूनं प्रक्षिप्तम् । वस्तुस्थितिस्तु ब्रह्माण्डे चत्वारो भागाः । भूभागो लोकभागो वा, लोकालोकाचलः, तमः, घनोदकं चेति । तत्र 'यावान् लोकालोकाचलः' इत्यस्य लोकालोकाचलं मर्यादीकृत्य यावान् लोको नाम स ब्रह्माण्डस्य इतरापेक्षया चतुर्थो भाग इत्यर्थः । नतु चतुर्थभागविस्तृत इति ।।

**तदुपरिष्टात् चतसृष्वाशास्वात्मयोनिना अखिलजगद्गुरुणा अभिनिवेशिता ये द्विरदपतयः ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ।। ३९ ।।**

'ये द्विरदपतयः ऋषभः पुष्करचूडो वामनः अपराजितः' इत्यत्रेदम् अवगन्तव्यम् । एते लोकस्थापनहेतवश्चत्वारो गजाः । तर्हि दिग्गजानाम् अष्टत्वं कथं युज्यत इति चेत् पाताले लोकभारवहाश्चत्वारो गजा वर्तन्ते । सागरैस्तुरगान्वेषणसमये ते दृष्टास्तुरगविषये पृष्टाश्चेति मार्कण्डेय-पुराणादवगम्यते । रुग्मिणीशविजयाच्चैतत् स्पष्टम् । 'क्ष्मां वहतेति नूनं प्रचक्रतुर्नागबलिम्' (१६स-४७श्लो)इत्युक्तेः ।।

**मृतेऽण्ड एव एतस्मिन्यदभूत्ततो मार्ताण्ड इति व्यपदेशः ।**

**हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ।। ४४।।**

'मार्तण्ड' इत्यत्र मृतं च तदण्डं च मृतण्डम् ।'शकन्ध्वादिषु पररूपं वाच्यम्' । मृतण्डे भवः मार्तण्डः । मृतण्डादणि णित्वादादिवृद्धिः ।।

**प्लक्षादिद्वीपस्थजनोपास्य-सूर्य-सोम-अग्नि-वरण-वायु-ब्रह्मान्तर्गत भगवद्गुणवर्णनात् मानसोत्तरगतभगवद्वर्णनाच्च भगवन्निष्ठत्वम् ।।**

**आकल्पमेष भगवानात्मयोगमायया विरचितविविध-लोकयात्रागोपीथायाथ योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं व्याख्यातम् ।। ४१ ।।**

'एतेन अलोकपरिमाणं च व्याख्यातम्' इत्यत्र लोकपरिमाणस्य 7,14,28000+55/7 शतयोजनत्वात् अलोकशब्देन यत्र लोकः प्रकाशो नास्ति तस्यान्धतमसः स्वीकारे द्विस्तावत् तस्य विस्तारः

14,28,56000+110 /7 शतयोजनानि ।।

अलोकशब्देन लोकभिन्नस्य ग्रहणे

50,00,00,000 -

7,14,28000+5 5/7 शतम् =

42,85,71000+4 5/7 शतम् योजनानि

लोकपरिमाणं सूर्यरथचक्रपरिभ्रमणमार्गतुल्यमित्युक्तं भुज्युब्राह्मणे ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे विंशोऽध्यायः**

## अथ एकविंशोऽध्यायः

**श्री शुक उवाच–**

**एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतश्च व्याख्यात एतेनैव हि दिवो मण्डलमानं तद्विद उपदिशन्ति ।।१ ।।**

'एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति' इत्यस्य यथा मेरोश्चतुर्दिक्षु ब्रह्माण्डकटाहपर्यन्तं पञ्चविंशत्कोटियोजनविस्तृतिरेवं मेरुमारभ्य कटोहोर्ध्वभागपर्यन्तं तावदेव विस्तृतिरित्यर्थः ।।

**यथा द्विदलनिष्पावादीनां तदन्तरेणान्तरिक्षमुपसन्धितम् ।।२।।**

'तदन्तरेणान्तरिक्षमुपसन्धितम्' इत्यत्रेदं बोध्यम् । यथा निष्पावं द्विदलीकृत्य पुनस्सन्धाने सूक्ष्मरेखा दृश्यते एवं स्वरादि-ऊर्ध्वलोकानां भुवाद्यधोलोकानां मध्ये भुवर्लोकापरपर्यायान्तरिक्षं सन्धितम् इति । अवश्यमेतदेवम् । स्वरादिकटाहोर्ध्वपर्यन्तपरिमितदेशस्य अर्धोनपञ्चविंशत्-कोटियोजनविस्तृतत्वात् भुवादिकटाहाधोभागपर्यन्तपरिमितदेशस्य पञ्चविंशत्-कोटियोजनविस्तृतत्वात् भुवर्लोकस्य केवलमर्धकोटियोजनपरिमितत्वात् ।।

एतस्मिन्नन्तरिक्ष एव रव्यादिध्रुवादिपर्यन्तानां ज्योतिषां स्थितिरित्यहो ब्रह्माण्डस्य विस्तृतिः ।।

**यन्मध्यगो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकान् प्रतपत्यवभासयत्यात्मभासा एष उदगयन- दक्षिणायन- वैषुव-संज्ञाभिरारोहणवरोहणादिभिर्दीर्घह्रस्वसमानाभिर्गतिभि-रारोहणावरोहणसमस्थानेषु यथासवनमभिपद्यमानो मकरादि-राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ।। ३ ।।**

'आरोहणावरोहणसमानस्थानेषु' इत्यत्रेदमवगन्तव्यम् । मेरौ स्थिता देवा वैद्युतरज्जुभिः सूर्यरथमुदगयने आरोहणस्थाने कर्षन्ति । दक्षिणायने अवरोहणस्थाने कर्षन्ति । वैषुवसंज्ञकमेषतुलयोः समस्थाने कर्षन्ति इति ।।

**एवं नवकोट्य एकपञ्चाशल्लक्षाणि च योजनानां मानसोत्तरगिरि-परिवर्तमानस्योपदिशन्ति तस्मिन्नैन्द्रीपुरी**

**मेरोः पूर्वस्माद्देवधानी नाम दक्षिणतो याम्या संयमिनी नाम पश्चाद्वारुणी निम्लोचनी नामोत्तरतः सौम्या विभावरी नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्ति-निवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ।। ७ ।।**

'तासु उदय-मध्यान्ह-अस्तमयमनिशीथानि' इत्यत्रेदं बोध्यम् । ऐन्द्रीं पुरीं यदा सूर्यरथः प्राप्नोति तदोदयः । याम्यां यदा आप्नोति तदा मध्याह्नम् । वारुणीं यदा आप्नोति तदा अस्तमयः । सौम्यां यदा आप्नोति ता निशीथेति । एतद्भरतवर्षस्थितानामपेक्षया । कुरुवर्षापेक्षया एतद्विपरीतं भवति । भद्राश्व-वर्षापेक्षया सौम्यामुदयः ऐन्द्र्यां मध्याह्नम्, याम्यामस्तमयः, वारुण्यां निशीथा । केतुमालापेक्षया एतद्विपरीतं भवतीति ।।

**यस्यैकं चक्रं द्वादशारं षण्नेमित्रिनाभि स्वयं संवत्सरात्मकं समामनन्ति तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रवन्मानसोत्तरे गिरौ परिभ्रमति ।। तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुरीयमानेन संमितः ।।**

'द्वितीयोक्षस्तुर्यमानेन सम्मित' इत्यत्रेदं ज्ञातव्यम् । प्रथमाक्षो मेरुमारभ्य मानसोत्तरपर्यन्तं विस्तृतः । एतत्परिमाणं जम्ब्वादिषड्द्वीपानां लवणादि षट्सागराणां पुष्करद्वीपस्यार्धस्य च परिमाणं मिलित्वा 157 1/2 लक्षयोजनानि भवति ।

षड्द्वीपपरिमाणम् 1/2+2+4+8+16+32=61 1/2 लक्षयोजनानि

षट्सागरपरिमाणम् 1+2+4+8+16+32 = 63 लक्षयोजनानि ।

पुष्करद्वीपार्धस्य 32लक्षयोजनानि ।

मिलित्वा 157 1/2 लक्षयोजनानि

अस्य चतुर्थांशः किञ्चिदधिक 39लक्षयोजनानि (39.37,507)

भूमिमारभ्य ध्रुवलोकः 37 लक्षयोजनाधिकदेशे वर्तते ।

किञ्चिद् व्यत्यासमगणय्य चतुर्थांश इत्युक्तमिति भाति ।।

**तथाऽन्ये च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त सप्त चैकैकशो रथस्था मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथङ्नामानः पृथक्कर्मभिर्द्वादश उपासते ।। १८ ।।**

'ऋषयः ..गणाः सप्त चतुर्दश मासिमासि' इत्यपपाठः । सप्तसप्त इत्येव साधु । चतुर्दशेत्यस्य योग्यताभावात् । एते सप्त सप्त द्वादशस्कन्धे एकादशाध्याये द्रष्टव्याः ।।

**लक्षोत्तरसार्धनवकोटियोजनपरिमण्डलभूवलयस्य क्षणेन गव्यूत्युत्तरद्विसहस्रयोजनानि स भुङ्क्ते ।। १९ ।।**

लक्षोत्तरसार्धनवकोटियोजनपरमण्डलभूवलयस्य' इत्यत्रेदं द्रष्टव्यम् । एकस्मिन् दिने रथचक्रसञ्चारपरिमितिरयम् ।

9,51,00,000 योजनानि इति ।

भुज्युब्राह्मणोक्तरीत्या 9,52,37,000+10 10/21 शतयोजनानि ।

रथचक्रस्य स्थौल्यमादाय एते समीकर्तव्ये इति भाति ।।

**'भीषोदेति सूर्यः' इत्युक्तप्रकारेण भगवतो भीषा जायमानानां सूर्योदयादीनां वर्णनेन भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे एकविंशोऽध्यायः**

## अथ द्वाविंशोऽध्यायः

**स होवाच शुकः यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वपि उपलभ्यमानत्वात् । एवं नक्षत्रराशिभिरुपलक्षितेन काल-चक्रेण ध्रुवं मेरुं प्रदक्षिणतः परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे वोपलभ्यमानत्वात् ।। २ ।।**

'यथा कुलालचक्रेण' इत्यादि ।। राशिचक्रमेकस्मिन् दिने 60 कलात्मकमार्गं चलति । सूर्यस्तु 59 कला10 विकलात्मकमिति सूर्य एकस्मिन् दिने किञ्चिदूनैककलया विलम्बते ।। राशयस्तु ज्योतिश्चक्रे मेषादिव्युत्क्रमेण वर्तन्ते । अतः सूर्यस्य राशीनामाभिमुख्येन गतिर्युज्यते ।।

**तत उपरिष्टाल्लक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ।। ११ ।।**

'तत उपरिष्ठात् लक्षयोजनतः/त्रिलक्षयोजनतः ति द्वौ पाठौ उपलब्धौ । बहुपाठेषु लक्षयोजनत इति । पेजावरमठीयताडवालपुस्तके तु त्रिलक्षयोजनत इति । तत्र पूर्वोक्तदिशा द्वितीयः पाठः सुलग्न इति मन्यामहे । प्रचलिते भूगोलवर्णने 'त्रिंशल्लक्षयोजनतः' इति वर्तते । एवं सति ध्रुवलोकस्योन्नतिः 67 लक्षयोजनानि भवन्ति । तदा पूर्वोक्तद्वितीयाक्षपरिमाणं न सङ्गच्छते ।।

किञ्चैवं सति ध्रुवः स्वर्गादप्युपरि वर्तत इति स्यात् । हन्त तर्हि कोटियोजनविस्तृतदशसहस्रयोजनपरिमितस्वर्गकन्दमतिक्रम्य कथं नायन-रश्मयो ध्रुवपर्यन्तं गच्छन्तीति चिन्तनीयम् ।।

**केचनैतज्ज्योतिरनीकं शिंशुमारसंस्थानस्य भगवतो**

वासुदेवस्य योगधारणायामनुवर्णयन्ति ।। २३ ।। यस्य पुच्छाग्रेऽर्वाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लांगूले प्रजापतिरग्निरिन्द्रो धर्म इति ।। २४ ।।

पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति ।। २५ ।।

दक्षिणायनानि तु सव्ये यथा शिंशुमारस्य कुण्डलीभोगसन्निवेशस्य पार्श्वयोरुभयो-रप्यवयवाः समसंख्या भवन्ति ।। २६ ।।

पृष्ठे त्वजवीथी आकाशगङ्गा चोत्तरतः पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्यो-रार्द्राऽऽश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे च दक्षिणवामयोर्नासिक-योर्यथासङ्ख्यं च श्रवणपूर्वाषाढे च दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्वपङ्क्तिषु युञ्जीत ।।२७।।

तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वेषु प्रातिलोम्येन प्रतियुञ्जीत ।। २८ ।।

शतभिषज्ज्येष्ठे द्वे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ।। २९ ।।

उत्तरहनावगत्स्यः अधरहनौ यमो मुखे चाङ्गारकः शनैश्चर ऊपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयोराहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः ।। ३० ।।

शिंशुमारेण धारणप्रकारः अस्मत्कृतस्थितिविलासे द्रष्टव्यः ।।

‘ज्योतिश्चक्रधारणाख्यशिंशुमारमहिमावर्णनेन भगवन्निष्ठत्वम् ।।

**इति श्रीमद्भागवते पञ्चमस्कन्धे द्वाविंशोऽध्यायः ।**

## अथ त्रयोर्विंशोऽध्यायः

**श्रीशुक उवाच–**

**अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं वालभत भगवदनुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हस्तस्य तात जन्मकर्मणी चोपरिष्टाद्वक्ष्यामः ।। १ ।।**

‘स्वर्भानुः नक्षत्रवच्चरति’ इत्यत्रेदं तात्पर्यम् । अश्विन्यादिनक्षत्राणि ज्योतिश्चक्रे अप्रदक्षिणक्रमेण वर्तन्ते । अत एव रोहिण्युदय आसन्नः कृत्तिकोदयादिति युज्यते । एवं स्वर्भानुरप्रदक्षिणं चरतीति । अप्रदक्षिणचरणं नाम वस्तुतः प्रदक्षिणचरणे अपि मन्दगतित्वात् नियतवक्रगतिः ।।

**यददस्तरणेर्मण्डलंप्रतपति तद्विस्तारतोयोजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यधान-कृद्वैरानुबन्धात्सूर्याचन्द्रमसावभिधावति ।।२।।**

‘द्वादशसाहस्रं सोमस्य’ इत्यत्र द्विगुणितदशसहस्रं विंशत्सहस्रमित्यर्थः । त्रयोदशसहस्रं राहोः’ इत्यत्र त्रिगुणितदशसहस्रं दशसहस्रं च चत्वारिंशत्-सहस्रमित्यर्थः ।।

‘राहुरोमरवीणां च मण्डलाद्विगुणोक्तिताम्’ इति तात्पर्यवचनात् ।।

‘यः पर्वणि सूर्याचन्द्रमसावभिधावति’ इत्यनेनेदं स्पष्टं भवति ।

राहुर्नाम न केवलं भूमिच्छाया वा चन्द्रच्छाया वा । किन्तु स्वकृष्णकिरणैः सूर्याचन्द्रमसावाच्छादयन् स्वर्भानुशिरस्याविष्टः असुरापसद इति । केवलच्छायायाः सूर्यचन्द्रगत्यैवापसरणात् भगवता रक्षणाय सुदर्शनचक्रप्रयोगानवकाशाच्च ।।

**तन्निशाम्योभयत्रापि भगवताऽभिरक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं चक्रं दुर्विषहं परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपराग इति वदन्ति लोकाः ।। ३ ।।**

'मुहूर्तमुद्विजमान' इत्यत्र मुहूर्तमित्युपलक्षणम् । मुहूर्तोपलक्षितं ततो न्यूनमधिकं वा किञ्चित् कालमित्यर्थः ।।

**ततोऽधस्तात् सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ।। ततोऽधस्ताद्यक्षरक्षःपिशाचभूतप्रेतगणानां विहाराजिरमन्तरिक्षं यावद्वायुर्वाति यावन्मेघा उपलभ्यन्ते ।।**

'तत-अधस्तात् यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमन्तरक्षम्' इत्यत्रेदं बोध्यम् । भूमेर्लक्षयोजनोत्सेधे रविमण्डलम् । ततः अधस्तात् दशयोजने भूमेर्नवतिसाहस्रयोजनोर्ध्वभागे राहुमण्डलम् । ततः अधस्तात् दशयोजने (भूमेरशीतिसाहस्रयोजनोन्नतस्थले) सिद्धचारणविद्याध्राणां सदनानि । ततः अधस्तात् यक्षादीनां विहाराजिरमिति ।।

अनेन सम्प्रति वैज्ञानिकाः 2.56,000 'मैलु(अपभ्रष्ठभाषायाम्)' आख्यदूरे यच्चन्द्रमण्डलमिति वदन्ति तत् भूमेः 40000 योजनोन्नतप्रदेशे वर्तमानं किञ्चित् पिशाचाजिरमिति सिद्ध्यति ।। भागवतोक्तचन्द्रमण्डलस्य सूर्यमण्डलादपि लक्षयोजनोन्नतस्थले विद्यमानत्वात् ।।

मण्डलविस्तृतिरपि सूचिकोक्तस्य । भागवतोक्ता विस्तृतिः 20,000 योजनानि । वैज्ञानिकचन्द्रविस्तृतिस्तु 2000 मैलु अथवा 300 योजनानि इति ।।

रुद्रपार्षदा तेजोरूपाणि गृहीत्वा ग्रहान् अन्यस्थलेषु प्रदर्शयन्तीत्यपि वदन्ति ।।

**उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः**
**सत्वाद्याः प्रकृतिगुणा यदीक्षयाऽसन् ।**
**यद्रूपं ध्रुवमकृतं यदेकमात्मन्**
**नाधात्कथमुह वेद तस्य वर्त्म ।। ३९ ।।**

**मूर्तं यः पुरुकृपया बभार सत्वं**
**संशुद्धं सदसदिदं विभाति यत्र ।**
**यल्लीलां मृगपतिराददेऽनवद्या-**
**मादातुं स्वजनमनांस्युदारवीर्यः ।। ४२ ।।**

**यन्नामश्रुतमनुकीर्तयेदकस्मा-**
**दार्तो वा यदि पतितः प्रलोभनाद्वा ।**
**हन्त्यंहः सपदि नृणामशेषमन्यं**
**कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ।। ४३ ।।**

**मूर्द्धन्यर्पितमणुवत्सहस्रमूर्ध्नो**
**भूगोलं सगिरिसरित्समुद्रसत्वम् ।**
**आनन्त्यादविदित विक्रमस्य भूम्नः**
**को वीर्याण्यपि गणयेत्सहस्रजिह्वः ।। ४४ ।।**

शेषान्तर्यामिसङ्कर्षणस्य स्तुतिरियम् ।।

**विराड्रूपिणो नाभ्यादिपादतलपर्यन्तानां लोकानां वर्णनेन विशेषतः शेषान्तर्यामिसङ्कर्षणस्तोत्रेण च भगवन्निष्ठत्वम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे त्रयोविंशोऽध्यायः**

## अथ चतुर्विंशोऽध्यायः

**भूद्वीपवर्षसरिदद्रिनभःसमुद्र-**
**पाताल-दिङ्नरकभागणलोकसंस्थम् ।**
**गीतं मया तव नृपाद्भुतमीश्वरस्य**
**स्थूलं वपुः सकलजीवनिकायधाम्नः ।। ४४ ।।**

'भूद्वीप' इति श्लोकेनातीताध्यायनवकेन कृतं भूगोलवर्णनं विराड्रूपस्य वर्णनमित्युक्तं भवति । अत एव भगवन्निष्ठत्वम् ।।

**एतस्मिन्नध्याये तु 'श्रुतिस्मृती हरेराज्ञे' इत्युक्तेरकर्मविकर्मभ्यां हर्याज्ञोल्लङ्घनेन प्राप्यानां नरकाणां वर्णनात् भगवन्निष्ठत्वं बोध्यम् ।।**

**इति श्रीमद्भागवते पञ्चमस्कन्धे चतुर्विंशोऽध्यायः**

**।। इति पञ्चमस्कन्धः ।।**

**।। इति श्रीपञ्चमस्कन्धगतप्रमेयसङ्ग्रहः ।।**

**।। श्रीपद्मिनीविष्णवर्पणमस्तु ।।**